A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGACĀRYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY, AND
REGISTRAR OF BOOKS, MADRAS.

PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.

VOL. VI.—DHARMA-ŚĀSTRA—
(continued).

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1909.

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGACĀRYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY, AND
REGISTRAR OF BOOKS, MADRAS.

PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.

VOL. VI.—DHARMA-ŚĀSTRA—
(continued).

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1909.

III. DIGESTS—(SPECIAL)—(*continued*).

(4) *Śrāddha*— (continued).

Name of the work.	Numbers.	Pages
Śrāddhanirṇaya	3078	2298
Śrāddhanirṇayadīpikā	3079	2299
Śrāddhabrāhmanādiniyama	3080	2300
Śrāddhavamanōcchiṣṭasaṁsargaprāyaścitta	3081	2301, 2302
Śrāddhavidhi	3082	2303
Śrāddhavisayavacanāni	3083	2303
Śrāddhādinirṇaya	3084	2304, 2305
Śrāddhādyupayuktavacanāni	3085	2306
Śrāddhīyasmṛtivacanāni	3086, 3087	2307
Satkriyākalpamañjarī	3088, 3089	2308 to 2310
Sannyāsisāpiṇḍyavidhi	3090	2311, 2312
Sanmārgakaṇṭakōddhāra	3091, 3092	2313, 2314
Sanmārgakaṇṭakōddhārakhaṇḍana (Munibhāvaprakāśikā)	3093	2314
Sapindīkaranavidhi	3094	2315
Sarvāṅgavapanavidhi	3095	2316
Sahagamanaśrāddha	3096	2317
Sāpiṇḍyaviṣaya	3097	2318
Smṛtivacanāni (Śrāddhaviṣayāni) .	3098	2318, 2319

(5) *Kālanirṇaya.*

Ardhōdaya	3099	2320
Upākarmanirnaya	3100	2320, 2321
Upākaraṇavicāra	3101	2322
Ēkādaśīnirṇaya	3102 to 3105	2322 to 2325
Kālanirṇayacandrikā	3106	2326
Kālamayūkha	3107, 3108	2327, 2328
Kālamādhavīya	3109 to 3113	2329 to 2331
Kālādarśa	3114	2332
Kālādarśaḥ Savyākhyaḥ	3115	2332 to 2334
Grahaṇanirṇaya	3116	2335
Jayantīnirṇaya	3117 to 3119	2336 to 2338
Tīthinirṇaya	3120	2339
Tithinirṇayakārikā	3121	2340
Tīthipradīpikā	3122	2341, 2342
Tithyādinirṇaya	3123	2343
Daśanirnaya	3124 to 3127	2344 to 2347
Nirṇayasindhu	3128 to 3137	2348 to 2353
Nṛsiṁhajayantīnirṇaya	3138	2353
Puṁsavanādikālanirṇaya	3139	2354, 2355
Bhuktidīpikā	3140	2356
Mantrōpadēśakālanirṇaya	3141	2357

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGACĀRYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY, AND
REGISTRAR OF BOOKS, MADRAS.

PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.

VOL. VI.—DHARMA-ŚĀSTRA—
(continued).

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1909.

III. Digests—(Special)—(*continued*).

(7) *Śānti*—(continued).

Name of the work.	Numbers.	Pages
Anāvṛṣṭiśānti	3233, 3234	2437, 2438
Apamṛtyuñjayaśānti	3235	2438
Apāmpratiṣṭhā	3236	2439
Amāprathamarajōdarśanaśānti	3237	2440
Alakṣmīśānti	3238	2441
Alakṣmīharatailadāna	3239	2442
Aśanihataśānti	3240	2143
Aśvaśānti	3241, 3242	2444
Aṣṭagrahayōgaśānti	3243	2445
Āyuṣyahōmavidhi	3244	2446
Ārōgyabeli	3245	2447
Āślēṣārkṣajananaśānti	3246	2447
Āślēsānakṣatrajātaśānti	3247	2448
Āślēsāśānti	3248, 3249	2449
Uttarānaksatrajātaśānti	3250	2450
Utpātaśānti	3251, 3252	2451
Udakaśāntividhi	3253	2452
Udyānapratisthā	3254	2453
Uparāgajanmanaksatraśānti	3255	2453
Ulūkaśānti	3256, 3257	2454, 2455
Rnavimōcani	3258	2455
Ēkanaksatrajātaśānti	3259	2456
Ēkamāsādijananaśānti	3260	2457
Ēkōdaramukhanirīkṣaṇavidhi	3261	2458
Aindrīhōmavidhi	3262	2458
Kadalīśānti	3263	2459
Kākapravēśaśānti	3264	2460
Kākamaithunadarśanaśānti	3265	2460
Kākavisthāśānti	3266	2461
Kākavisṭhāsparśaśānti	3267	2462
Kākaśyēnapatanaśānti	3268	2462
Kākasparśaśāntividhi	3269	2463
Kākōlūkakapōtaśānti	3270	2463
Kāruparvavidhāna	3271	2464
Kuhūśānti	3272 to 3277	2465 to 2467
Kuhūśāntikalpa	3278	2468
Kurmapravēśaśānti	3279	2469
Kṛkalāsaśānti	3280	2470
Kṛtyāśānti	3281	471
Kṛṣṇacaturdaśījananaśānti	3282	2471

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGACĀRYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY, AND
REGISTRAR OF BOOKS, MADRAS.

PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.

VOL. VI.—DHARMA-ŚĀSTRA—
(continued).

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1909.

III. DIGESTS—(SPECIAL)—(*continued*).

(7) *Śānti*—(continued).

Name of the work.	Numbers.	Pages
Dānamantra	3333	2509
Divājātāśvaśānti	3334	2509
Divānaksatrādidarśanaśānti	3335	2510
Dusvapnaśānti	3336 to 3338	2511, 2512
Dūrvāhōmavrdhi	3339	2513
Dūrvāhōma	3340	2514
Drgdōṣaśānti	3341	2515
Dhaniṣṭhādimaranaśānti	3342	2515
Dhanvantariśānti	3343	2516
Nakṣatragaṇḍaśānti	3344	2517
Nakṣatrabali	3345	2518
Nakṣatraśānti	3346	2519
Naksatrahōma	3347, 3348	2519, 2520
Narapatanaśānti	3349	2521
Navagrahayajña	3350	2521
Navagrahaśānti	3351	2522
Nāgapratiṣṭhā	3352 to 3354	2523, 2524
Nāgapratiṣṭhāvidhi	3353 to 3355	2524, 2525
Nālavēṣṭanaśānti	3356	2525
Pañcagrahayōgaśānti	3357	2526
Pañcamariṣṭaśānti	3358 to 3361	2527 to 2529
Parjanyahōmavidhi	3362	2529
Pallīsaraṭapatanaśānti	3363	2530
Pitṛjanmarksakumārajananaśānti	3364	2531
Pitrādiṛkṣajananaśānti	3365	2531
Pīnasarōgaśānti	3366	2532
Puṇyāhavācana	3367	2533
Putrakāmeṣṭi	3368	2534
Punarādhāna	3369	2534
Puruṣasūktahōma	3370	2535
Pusyanaksatraśānti	3371	2536
Pusyapūrvāsāḍhāśānti	3372	2536
Pūgasīmantavidhi	3373, 3374	2537
Pūrvaphalgunīprathamārtavaśānti	3375	2538
Pūrvāsādhānakṣatrajananaśānti	3376	2539
Pūrvāṣādhānakṣatrajātaśānti	3377	2539
Pūrvāsāḍhādinakṣatrajananaśānti	3378	2540
Prathamārtavavārādiphalāni	3379	2541
Prathamārtavaśānti	3380 to 3383	2541 to 2544
Prasūtigaṇḍadōṣaśānti	3384	2544

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGACĀRYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY, AND
REGISTRAR OF BOOKS, MADRAS.

PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.

VOL. VI.—DHARMA-ŚĀSTRA—
(continued).

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1909.

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGACĀRYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY, AND
REGISTRAR OF BOOKS, MADRAS.

PREPARED UNDER THE ORDERS OF THE GOVERNMENT OF MADRAS.

VOL. VI.—DHARMA-ŚĀSTRA—
(continued).

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1909.

No. 3047. अपरविषयवचनानि.
APARAVIṢAYAVACANĀNI

Pages, 9. Lines, 4 on a page.

Begins on fol. 76*b* of the MS. described under No. 2973.
A few leaves from fol. 29*b* also deal with the same subject.
Relates to the performance of funeral obsequies.

Beginning :

शुक्राद्यशुभवारेषु नन्दा भद्रा चतुर्दशी ।
उत्तरत्रयरोहिण्यां पूर्णे चन्द्रे तु जन्मनि ॥
एतेष्वेव(ष्वपि) च कर्तव्यं मातापित्रोस्सपिण्डनम् ।

पुनर्दहनम्—

चतुर्दशीतिथिं नन्दां भद्रायां(ख्यां) शुक्रवासरे(रम्) ।
सितेज्ययोरस्तमयं द्व्यङ्गिभं विषमाङ्गिभम् ॥
शुक्लद(प)क्षं तु सन्त्यज्य पुनर्दहनमिष्यते ।

End :

आधाने यज्ञकाले च वपनं षट्सु विधीयते ।
अत्यक्तमन्नं विप्रस्तु पाणिना स्पृशते यदि ॥
त्रयस्ते नरकं यान्ति दाता भोक्ता पिता तथा ।
सपिण्डास्सप्तमादर्वाक् सोदका आ चतुर्दश ॥
सगोत्रा एकविंशत्या दशाहं त्रिदिनं दिनम् ।

१. पुनर्दहनम्.
२. अनुमासिकविषयः.
३. अस्थिसञ्चयनकालः.
४. त्रिपुष्करयोगः.
५. सपिण्डीकरणकालनिर्णयः.

No 3048. अपरविषयवचनानि.
APARAVIṢAYAVACANĀNI.

Pages, 4. Lines, 4 on a page.

Begins on fol. 23*a* of the MS. described under No. 3029

Beginning :

मन्त्रवत्संस्कृतस्यापि असमाप्तोदकस्य तु ।
अर्वाग्दशदिनादूर्ध्वं पुनर्दाहो विधीयते ॥

किञ्च —

पुत्रं विना कृतेऽन्येन दाहादिप्रेतकर्मणि ।
प्रेतकर्म पुनः कुर्यादौरसो दहनं विना ॥

End :

अङ्गुष्ठमूलदेशे तु वामहस्ते तिला(न्)क्षिप्ये(पे)त् ।
ते तिला ब्रह्मभूयास्यात्(य) तत्तोयममृतं भवेत् ॥

No. 3049. अपुत्रकविधिः.
APUTRAKAVIDHIḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 42*a* of the MS. described under No. 2973.

Incomplete.

This is taken from Āṅgirasasmṛti, and gives out by whom and how the obsequies of a person, who has no son, have to be performed.

Beginning :

दाहादि मन्त्रवत् पित्रोर्विदध्यादौरसस्सुतः ।
तदभावे तु पौत्रश्च ततपुत्रः पुत्रिकासुतः ॥
क्षेत्रजो दत्तकः क्री(क्री)तः कृत्रिमुद्ध(मस्सु)त एव च ।
अपविद्धश्च पत्नी च गूढजः कन्यकासुतः ॥

End :

षण्मासे चाष्टमासे वा वत्सरे परिमाणिकम् ।
तत्कालं नाशमाप्नोति अथ वा कर्तृनाशनम् ॥

इत्याङ्गिरसवचनात्.

No. 3050. अभ्युदयश्राद्धम्.
ABHYUDAYAŚRĀDDHAM.

Pages, 4. Lines, 9 on a page.

Begins on fol. 2*b* of the MS. described under No. 2840.

By Śaunaka—regarding the ceremonies generally performed on auspicious occasions with a view to propitiate the Pitṛs.

Complete.

Beginning :

अथातोऽभ्युदयश्राद्धमहं वक्ष्या(मि शौनकः) ।
. . . . . न पाणिग्रहेषु च ॥
आधाने यज्ञकाले च दशस्वभ्युदयं स्मृतम् ।
आमन्त्र(न्त्रि)तद्विजाग्र्याणां कुर्यात् पूर्वेद्युरेव तु ॥
शुचिर्भूत्वान्तिकं गत्वा योग्यानां (भाविता)त्मनाम् ।
स्वयमेवान्तिकं गत्वा तेषां कुर्यान्निमन्त्रणम् ॥
मातृवर्गन्तु पूर्वं स्यात् पितृवर्गं ततः परम् ।
मातामहं ततः पश्चात् आद्यन्तं वैश्वदेविकम् ॥

End :

वृद्धिश्राद्धमकृत्वा चेत् तत् सर्वं राक्षसं भवेत् ।
तेषां क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः ॥

Colophon :

इति बृहच्छौनकीये नान्दीश्राद्धविधिः ॥

No. 3051. अवभृथेष्टिः.
AVABHṚTHĒṢṬIḤ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 5. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 88*a*. The other works herein are Vaiṣṇavaprakriyā 1 and 24*a*, Brahmamēdhādhyāya 20*a*, Sapiṇḍīkaraṇavidhi 30*a*, Prapannaurdhvadēhikavidhi 40*a*, Sanmārgakaṇṭakōddhāra 44*a*, Prapattiviṣaya (Tamil) 57*a*, Āśaucavisaya (Tamil) 60*a*.

Incomplete.

Describes certain supplementary rites to be performed at the end of a sacrifice with a view to conclude it.

Beginning :

अथातोऽवभृथेष्टिं वक्ष्यामः—

अत्र मङ्गलाद्यनेकार्थपरत्वेऽपि अथशब्दस्य अतश्शब्दशिरस्कत्वादानन्तर्यमेवार्थः । और्ध्वदेहिकस्य देहा(न)न्तरभावित्वादिदंशब्दस्य सन्निहितवस्तुपरत्वादतश्शब्देन देहः परामृश्यते . . . . . अतो देहवियोगानन्तरभाव्यौर्ध्वदेहिकं वक्ष्याम इत्यर्थः ।

End :

न किञ्चिद्विश्रमस्थानं पथि तस्मिन् युधिष्ठिर ।
कण्टकाकीर्णमार्गेण तप्तवालुकपांसुना ॥
दह्यमानास्तु गच्छन्ति नरा दानविवर्जिताः ।
तस्माद्दानं तु कर्तव्यं मृतिकाले कथञ्चन ॥

No. 3052. एकोद्दिष्टवचनानि.

EKODDIṢṬAVACANĀNI.

Pages, 2. Lines, 4 on a page.

Begins on fol. 93*r* of the MS. described under No. 2973.

Incomplete.

Certain rules regarding the ceremony to be performed on the 11th day after death.

Beginning :

एकोद्दिष्टं नवश्राद्धं सपिण्डीकरणं तथा ।
एकस्मिन् दिवसे कुर्यात् एकोद्दिष्टं तु निष्फलम् ॥

End :

पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पैतृकम् ॥
एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥

No. 3053. काम्यश्राद्धम्.

KĀMYAŚRĀDDHAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 4*a* of the MS. described under No. 2840.

By Śaunaka. Describes certain ceremonies the performance of which is optional, as they are intended to lead to the realisation of particular desired objects.

Complete.

Beginning:

काम्यश्राद्धमहं वक्ष्ये शौनको मुनिसत्तमः ।
पुत्रस्वीकरणं कुर्यात् द्विजश्रेष्ठात् प्रयत्नतः ॥
नापुत्रस्य लोकोऽस्तीति श्रुतिरेषा सनातनी ।
जातिश्चेत्त्रिषु वर्णेषु अनुलोमेन वा न च ॥
देवतानामृषीणां च पितृणामनृणस्स्मृतः ।

End:

दक्षिणाहीनकर्माणि निष्फलानि भवन्ति हि ।
तस्माद्यत्नेन दातव्यं(व्या) दक्षिणा च स्वशक्तितः ॥

Colophon:

इति बृहच्छौनकीये काम्यश्राद्धविधिः ॥

No. 3054. गर्भिणीसंस्कारः.

GARBHIṆĪSAṀSKĀRAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 75*b* of the MS. described under No. 2973.

Complete.

On the cremation of the dead body of a pregnant woman a

Beginning:

मृता चेद्गर्भिणी नारी तस्यास्संस्कार उच्यते ।
बोधायनभरद्वाजशौनकाद्यैर्यथोदितम् ॥

शतकुम्भोदकै(:) पश्चादादौ प्रक्षाळ्य वाससा ।
आच्छाद्य गन्धपुष्पाद्यैरलङ्कृत्य द्विजाज्ञया ॥

स्वगृह्योक्तविधानेन नीत्वा तां तु श्मशानकम् ।
पश्चाद्दारुचितेः प्रेतां दक्षिणे वा यथाविधि ॥

निधाय गृह्यतन्त्राणि कृत्वा दर्वीनिमार्जनात् ।
हिरण्यगर्भ इत्युक्त्वा विलिखेदसिनोदरम् ॥

End:

प्राणायेत्यादिभिः पञ्च चक्षुषेत्यादिपञ्चभिः ।
बोधायनाद्या इत्याहुर्व्याहृतीभिस्तु शौनकः ॥

अभिषिच्य पुनर्मन्त्रैर्द्विजानुज्ञामवाप्य च ।
अव्रणं जठरं कृत्वा चितावध्यूहनादिकम् ॥

समानमन्यत्सर्वं च सुवर्णं हस्तातादथ(?) ।

No. 3055. गोदानविधिः.

GŌDĀNAVIDHIḤ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Page, 1. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Regarding the gift of cow made with a view to extricate the departing soul from certain troubles which it is supposed to encounter on the way to the other world.

Incomplete.

Begins on fol. 69*a*. The other works herein are :—

Ṛṣipañcamīvratōdyāpanam 1*a*
Āmuktābharaṇasaptamīvratōdyāpanam 4*a*
Arundhatīvratakalpaḥ .. 7*a*
Kēdāravratakalpaḥ .. 10*a*
Śivarātrivratakalpaḥ .. 24*a*
Śanitrayōdaśīvratakalpah.. 32*a*
Āmuktābharaṇasaptamīvratakalpaḥ 35*a*
Ārdrāṣṭamīvratakalpaḥ .. 43*a*
Śivakṛṣṇāṣṭamīvratakalpaḥ 47*a*
Umāmahēśvaravratam .. 49*a*
Viṣṇupratiṣṭhākalpaḥ .. 51*a*
Mahāvartikalpaḥ .. 53*a*
Mahādīpavratam .. 55*a*
Mahātiladīpam .. 56*a*
Mahādīpavratam .. 61*a*
Ardhōdayakalpa .. 62*a*
Sōmavāravratakalpa .. 65*a*
Sōmavāravratōdyāpana .. 68*a*
Caturdaśīvratōdyāpana .. 70*a*
Naṣṭadōrakaprāyaścittam .. 76*a*
Anantavratōdyāpanakalpa 79*b*
Varalaksmīvratam .. 92*a*
Yamunāpūjāvidhānam .. 94*a*
Anantavratapūja 97*a*
Anantavratakathā 100*b*
Umāmahēśvaravratam ..108*a*
Lakṣmīnārāyaṇavratam ..113*a*
Laksmīnārāyaṇavratakathā 125*a*
Bṛhatyumāvratakalpa ..134*a*
Tulasīvratakalpa 135*a*
Dvādaśīvratam 137*a*
Dhātrīkalpa 138*a*
Rathasaptamīvratakalpa 139*a*
Haritālikāmahāvratam ..142*a*
Santānagōpālavratam ..154*a*
Umāmahēśvaravratam ..157*a*

Beginning :

व्यासः—

आसन्नमृत्युना देया गौस्सवत्सां(त्सा) च पूर्ववत् ।
तदभावे तु गौरेव नरकोत्तारणाय वै ॥
पूर्ववत्स्वर्णशृङ्गीं दानविधिना रौप्यखुराम् ।
तदा यदि न शक्तोऽपि दातुं वैतरणीन्तु गाम् ॥

End :

यो सा वैतरणी नाम यमद्वारे महानदी ।
तस्याः प्रमाणं रूपञ्च शृणु सत्यं भयावहम् ॥
शतयोजनविस्तीर्णं वृथा.

No 3056. ग्रहणश्राद्धनिर्णयः.

GRAHAṆAŚRĀDDHANIRṆAYAḤ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 9. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Regarding the determination of the time for performing the annual Śrāddha ceremony when it happens to fall on the day of a solar or lunar eclipse.

Incomplete.

Begins on fol. 13*a*. The other works herein are—Śūdrapañcasaṁskārādiḥ 1*a*, Jitantēpañcakam 4*a*, Hayagrīvānuṣṭup 11*a*, Grahaṇaviṣaya 19*a*, Bhagavadviṣaya (Maṇipravāḷa) 24*a*, Hayagrīvānuṣṭup 35*a*, Hayagrīvaikākṣarī 35*b*, Nṛsimhānuṣṭup 36*a*, Nārasimhaēkākṣarī 36*b*, Vāsudēvadvādaśākṣarī 36*b*, Viṣṇuṣaḍakṣarī 37*a*, Sudarśanamantraḥ 37*b*, Gāruḍapañcākṣarī 38*a*, Nāmatrayam 38*b*, Santānagōpālamantraḥ 39*a*, Nrsimhayantram 39*b*, Nṛsimhāṣṭakōṇam 40*a*, Gāruḍayantra 40*b*, Pravaranirṇayaḥ 41*a*, Dhātumūlajīvarāśivivara (Tamil) 43*a*, Grahaṇanirṇayaḥ 48*a*, Puṇyakālasaṅkalpaprakāraḥ 60*a*.

Beginning:

लोका(लौगा)क्षिशाट्यायन्यादिवचनैर्ग्रहणे दिने ।
प्रत्यब्दश्राद्धकरणं स्फुटमेव प्रपञ्चयते ॥

ततस्तस्य प्रमाणानि लिख्यन्ते स्मृतिमूलतः ।
निर्मत्सराः प्रगृह्णन्तु त्यजन्त्वन्ये समत्सराः ॥

प्रमाणानि तदर्थाश्च माधवाद्यैरुदाहृताः ।
लिखाम्यहन्तु तानेव न स्ववाक्यं न योजना ॥

विशयस्तत्र यदि चेत् शोधनीयो विशेषतः ।
सर्पस्सुप्तो न बोद्धव्यो रज्जुबुद्ध्या ह्यपण्डितैः ॥

प्रत्यवायभयाक्रान्ताः प्रमाणशरणास्स्वयम् ।
न साङ्केत्यमुपाश्रित्य प्रपतिष्यन्ति पण्डिताः ॥

तत्रादौ सूर्यचन्द्रग्रहणदिने प्रत्याब्दिकसंभवे कर्तव्यक प्यन्ते—

रविग्रहो भवेद्यदा दिवास्तमानतः पुरा
विमोचनं भवेद्यदि प्रशस्तमत्र पैतृकम् ।
समापनन्तु रात्रितोऽपि कार्यमेव भोजनं
न कार्यमत्र मध्यपिण्डभोजनञ्च भार्यया ॥

End :

यस्मिन् यामे चन्द्रग्रहणं ततः पूर्वं यामत्रयमध्ये न भोक्तव्यम् ; सूर्यग्रहणे तु ततः पूर्वं यामचतुष्टयमिति प्रतिज्ञाय प्रमाणान्युदाहृतानि । तथाचोक्तं भारते—

अर्वाग्यामत्रयादिन्दोर्ग्रहणे भुक्तिमाचरेत् ।
चतुर्यामादधश्चैव राहुग्रस्ते दिवाकरे ॥ इति ॥

No. 3057. घटस्फोटविधिः.

GHAṬASPHŌṬAVIDHIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2888.

Complete.

This is taken from the Sakalasmṛtisārasaṅgraha.

Regarding a ceremony which is performed in connection with the excommunication of a person for heinous misconduct. It consists of breaking a pot in the presence of Gurus, Jñātis and other relatives, and reciting certain Mantras, so that the person on whose account the ceremony is performed is thenceforward considered to be practically dead to all his relatives.

Beginning :

याज्ञवल्क्यः —

" दासीं कुम्भं बहिर्ग्रामान्निनयेरन्सबान्धवाः ।
पतितस्य बहिष्कुर्युस्सर्वकार्येषु चैव तम् ॥"

मनुः—

" पतितस्योदकं कार्यं सपिण्डैर्ब्राह्मणैरसह ।
निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ ॥
दासी घटमपां पूर्णं पर्यसेत्प्रेतवत्सदा ।
अहोरात्रमुपासीरन् आशौचं बान्धवैस्सह ॥
निवर्तेरंस्ततस्तस्मात्सम्भाषणसहासने ।
दायाद्यस्य प्रदानं च यात्रामेव च लौकिक(की)म् ॥"

End :

तथा चापस्तम्बः —

संवत्सरान्ते शुद्ध्यर्थं श्राद्धादौ योग्यतार्थं च सर्वप्रायश्चित्तपूर्वकं नारायणबलिं कृत्वा दहनोदकादि(दी)ति सङ्क्षेपः ॥

पतितानां न दाहः स्यान्नान्तेष्टिर्नास्थिसञ्चयः ।
न चाश्रुपातः पिण्डो वा न च श्राद्धादिकं क्वचित ॥
अपृष्ट्वा चैव भर्तारं या नारी कुरुते व्रतम् ।
सर्वं तस्या(द्या)क्षसान् गच्छेदित्येवं मनुरब्रवीत् ॥
बान्धवानां सजातीनां दुर्वृत्तिं कुरुते तु या ।
गर्भपातं च या कुर्यान्न तां सम्भाषयेत्क्वचित् ॥
तस्याः पातं(पं) ब्रह्महत्याद्विगुणं गर्भपातने ।
प्रायश्चित्तं न तस्यास्ति तस्यास्त्यागो विधीयते ॥

Colophon :

इति सकलस्मृतिसारसङ्ग्रहे घटस्फोटनविधिस्समाप्तः ॥

No. 3058. जीवश्राद्धम्.

JĪVAŚRĀDDHAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 60*b* of the MS. described under No. 2840.

Regarding the performance of the Śrāddha ceremony in relation to a living person

By Śaunaka.

Complete.

Beginning :

जीवश्राद्धं प्रवक्ष्यामि शौनकोऽहं द्विजन्मनाम् ।
कृष्णपक्षे चतुर्दश्यां स्नात्वोपोष्य समाहितः ॥

तस्मिन्नहनि(सं)भारानुपकल्प्य यथाक्रमम् ।
षड्रसं होमसूनां च कुशस्कन्धापकं तथा ॥

End :

नारायणबलिं कुर्याद्यथाविधि र(न)तन्द्रितः ।
अष्ट वर्षा भवेत्पश्चा(युश्चे)त्पुनस्संस्कारमाचरेत् ॥

Colophon :

इति शौनकीये जीवश्राद्धविधिः ॥

No. 3059. तर्पणादिविधिः.

TARPAṆĀDIVIDHIḤ.

Substance, palm-leaf.. Size, $15\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 13. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 27*a*. The other works herein are, Prapannagatividhi 1*a*, Śrāddhanirṇayadīpikā 6*a*, Sāpiṇḍyaviṣaya 33*a*.

Regarding the performance of Tarpaṇa, which consists chiefly in offering libations of water to the manes of deceased ancestors.

Incomplete.

Beginning :

पितृतर्पणं द्विविधम्—नित्यं नैमित्तिकं च । तत्र वर्गद्वयोद्देशेन कारुण्योद्देश्ये(शे)न च [तत्र कारुण्योद्देशेन] वसुरुद्रादित्यरूपरहिततया जलमात्रेण अहरहःकर्तव्यतया यद्विहितं तत्र (नित्य) पितृतर्पणम् । यथा च याज्ञवल्क्यः—

सवर्णेभ्यो जलं देयं नासवर्णेभ्य एव च ।
नाममात्रस्वधाकारैः प्रत्यहं तर्पयेत्सुधीः ॥ इति ।

End :

सप्तविंश(ा)द्दिनादूर्ध्वं त्रियहस्यू(स्सू)नमासिकम् ।
चत्वारिंशद्दिनादूर्ध्वं पञ्चाहस्सु त्रिपक्षकम् ॥
ऊनषाण्मासिकं चैव सप्तत्यतिशतात्परम् ।
ऊनाब्दिकं तथा पञ्चचत्वारिंशत्श(च्छ)तत्रयम् ॥

No. 3060. दशाहान्तस्समाप्तिनिर्णयः.

DAŚĀHĀNTASSAMĀPTINIRṆAYAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 17*b* of the MS. described under No. 2973.

Rules regarding the completion of the ten days' obsequial ceremonies, in a shorter period when necessary, *i.e.*, within 3 days.

Deals with how and when certain religious ceremonies are to be carried out, when they fall within the ten days of pollution after a death.

Incomplete.

Beginning :

दशाहमध्ये यदि दर्श आप(ते)द्युर्दशाहात्तिलवारिपिण्डान् ।
पुत्रीसुतो दत्तक औरसश्च शेषास्समास्तत्र समापयेयुः ॥

End :

पिता माता च भार्या च ज्येष्ठभ्रातृपितृव्ययोः(कौ ।)
औपासनाग्नावेतेषु कुर्यादन्येषु लौकिके ॥

No. 3061. देशान्तरमृतिविषयः.

DEŚÂNTARAMṚTIVIṢAYAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 80*b* of the MS. described under No. 2973.

Complete.

Regarding the funeral ceremonies to be conducted in relation to one who has died in a foreign land.

Beginning :

देशान्तरविषये बृहस्पतिराह—

महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः ।
वाचो यत्र विभिद्यन्ते तद्देशान्त(र)मुच्यते ॥
देशान्तरं वदन्त्येके षष्टियोजनमायतम् ।
चत्वारिंशद्वदन्त्येके त्रिंशदन्ये वदन्ति च ॥
चतुर्दशि(शी)तिथिं नन्दां सभद्रां शुक्रवासरम् ।
सितेज्ययोरस्तमयं व्यङ्गिभं विषमाङ्गिभम् ॥
शुक्लपक्षं तु सन्त्यज्य पुनर्दहनमिष्यते ।
यस्य संवत्सरादर्वाक् पुनर्दहनकर्मणि ॥
न च कालपरीक्षा स्यान्न मौढ्यं गुरुशुक्रयोः ।

* * * *

अन्तर्दशाहव्यतिरिक्तविषयम्—

देशान्तरे मृते विप्रे प्रवासे कालचोदिते ।
देहनाशमनुप्राप्ता . . यातिर्नैव विद्यते ॥

End:

पालाशस्यास्थिदाहेषु सद्यस्सञ्चयनं भवेत् ।
पालाशमन्त्र(न्त्रो)जप्यं(प्यः)स्यात्त्वस्थिदाहेषु निश्चयम् ॥
देशान्तरगते प्रेते यस्मिन् वार्तयते(तः)श्रुते ।
मृताहस्तद्दिनं प्राहुः तत्र(ा)ज्ञाते दिने सति ॥

No. 3062. नारायणबलिः.
NĀRĀYANABALIḤ

Pages, 3. Lines, 8 on a page

Begins on fol. 68*b* of the MS. described under No. 2840.

Deals with a special obsequial ceremony of the above name to be conducted in connection with certain specified cases of death.

Complete.

By Śaunaka.

Beginning:

शौनकोऽहं प्रवक्ष्यामि नारायणबलिं परम् ।
चण्डालादुदकात् सर्पात् ब्राह्मणोवै(णाद्वै)द्युतादपि ॥
दंष्ट्रिभ्यश्च च (श्च)शृङ्गिभ्यो रज्जुशस्त्रविषादिभिः ।
देशान्तरगतानां च मृतानाञ्चान्यसाधनैः ॥
जीवश्राद्धकृतानां च नैष्ठिकानां तथैव च ।
यतीनां चैव योगीनाम् अन्येषां मोक्षकाङ्क्षिणाम् ॥

End:

आद्यन्तयोस्तु पुण्याहं कर्तव्यं श्रियमिच्छता ॥
नारायणबलिं चेदं(मं) हरिप्रीतिकरं शुभम् ।
यः प्राह तस्मै विदुषे केशवाय नमो नमः ॥

Colophon:

इति शौनकीये नारायणबलिविधिः ॥

No 3063. नारायणबलिविचारः.
NĀRĀYAṆABALIVICĀRAḤ.

Substance, palm-leaf. Size, 13¼ × 1¼ inches. Pages, 30. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 81*a*. The other works herein are—Sanmargakaṇṭakōddhāra 1*a*, Sanmārgakaṇṭakōddhārakhaṇḍana (Munibhāvaprakāśikā) 18*a*, Prapannagatidīpikā 43*a*.

Discuses the ceremony of Nārāyaṇabali.
Complete.
A work by Laksmaṇa.

Beginning :

नमस्त्र्यन्तसूरीन्द्रसूक्तिविश्रान्तिभूमये ।
श्रीमद्वेदान्तगुरवे वत्सवंशाब्धिभानवे ॥

भवदवपरिलीढान्माद्दशानत्र मूढा-
नव(वि)तुमुदभवद्यो वेदचूडार्यवर्यः ।
पुनरपि करुणाब्धिर्वत्सवंशे तदाख्या-
प्रकटितनिजभूमा सन्निधिस्सन्निधत्ताम् ॥
परवैरिवदावदोक्तिवाराकरवैफल्यदसूक्तियुक्तिकानाम् ।
करवै प्रणतीर्गुरूत्तमानां परवैशद्यकृते तदुक्तिजाले ।

यत्तावदुक्तम्--नित्यनैमित्तिकेषु यत्पुनः फलश्रवणं न तत्र तात्पर्यं; प्रत्यवायनिवृत्तेरेव प्रयोजनत्वात्; विज्ञानेश्वरोक्तरीत्या वस्वादिसम्बन्धप्राप्तेः तत्काममात्रविषयत्वादिति । तदयुक्तम्—एकस्मिन्नेवाधिकारविधौ अधिकारिभेदेन नित्यनैमित्तिकयोः फलतात्पर्यनास्तित्वास्तित्वयोः अभिप्रेतत्वेन नित्यानित्यसंयोगविरोधस्य दुर्वारत्वात् । उत्तरत्र चकारप्रयोगेण उत्तरोत्तरं प्रति पूर्वपूर्वस्य प्रयोजकत्वमभिप्रेतामिति गम्यते ।

End :

किञ्च वृद्धहारीतस्मृतौ—

अथ नारायणबलिर्मुनिभिस्सम्प्रकीर्तितः ।
स्वर्गतानां च सर्वेषां कर्तव्यो वैष्णवोत्तमैः ॥

इति । मृतानां पित्रादीनां सकामत्वेऽपि वैष्णवोत्तमैः नारायणबलेः कर्तव्यत्वमभिधाय,

यस्तु भोगतया विष्णोः सत्कृत्यं कुरुते नरः ।
स एव परमैकान्ती महाभागवतोत्तमः ॥

इति वैष्णवोत्तमलक्षणाभिधानेन नारायणबलेः स्वयम्प्रयोजनत्वं सिद्धं भवतीति सन्तो विभावयन्तु ॥

श्रीमते धीमते वत्सवंशाम्बु(धि)विवस्वते ।
नतान्समवते तन्वे श्रुत्यन्तगुरवे नमः ॥

No. 3064. नारायणबलिविधिः.
NĀRĀYAṆABALIVIDHIḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 116*a* of the MS. described under No. 2786.

Deals with Nārāyaṇabali.

Beginning :

शौनकोऽहं प्रवक्ष्यामि नारायणबलिं परम् ।
चण्डालादुदकात्सर्पात् ब्राह्मणाद्वैद्युतादपि ॥
दंष्ट्रिभ्यश्च नखिभ्यश्च रज्जुसर्पविषादिभिः ॥
देशान्तरमृतानां च मृतानां चान्यसाधनैः ॥

End :

अहन्येकादशे प्राप्ते पार्वणं तु विधीयते ।
सपिण्डीकरणं चैव न कुर्वीत कदाचन ॥
त्रिदण्डग्रहणादेव प्रेतत्वं नैव गच्छति ।
एतदेव हि पर्याप्तं भिक्षोरेकान्तशीलिनः ॥ इति ॥

No. 3065. पितृतर्पणम्.
PITṚTARPAṆAM.

Pages, 6. Lines, 8 on a page.

Begins on fol. 3*a* of the MS. described under No. 2972.

Deals with the ceremony of Tarpaṇa.

Beginning :

पितृतर्पणं द्विविधम्—नित्यं, नैमित्तिकं च । तत्र वर्गद्वयोद्देशेन कारुण्योद्देशेन च वसुरुद्रादित्यरूपरहिततया जलमात्रेणाहरहः-कर्तव्यतया यद्विज्ञातं तन्नित्यतर्पणम् ।

तथाच याज्ञवल्क्यः—

सवर्णेभ्यो जलं देयं नासवर्णेभ्य एव च ।
नामगोत्रस्वधाकारैः प्रत्यहं तर्पयेत्सुधीः ॥ इति ॥

End:

आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ।
कर्तुस्तात्कालिका(की)शुद्धिः अशुद्धिः पुनरेव सः ॥

No. 3066. पुनःखननम्.

PUNAḤKHANANAM.

Substance, palm-leaf. Size, $11\frac{7}{8} \times 1\frac{3}{4}$ inches. Pages, 2. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are, Prāyaścittaprayōga 2*a*, Yatisaṁskāraprayōga 31*a*.

Incomplete.

By Śaunaka. Regarding the reburial of Yatis or Hindu ascetics.

Beginning :

शौनकोऽहं प्रवक्ष्यामि यतीनामूर्ध्वरेतसाम् ।
पुनःखननसंस्कारं देशान्तरमृते यतौ ॥
अमन्त्रवच्च संस्कारे सृगालादिविघातिते ।
अन्यथा संस्कृते चैव पुनःखननमिष्यते ॥
पुनश्च खनने प्राप्ते स्नात्वा कर्ता यथाविधि ।
धृतवस्त्रोर्ध्वपुण्ड्रश्च सालग्रामं प्रपूज्य च ॥

End:

ततः पूर्वोक्तमार्गेण पात्रसादनपूर्वकम् ॥
दशहोत्रजपैस्सार्धं नालिकेरं विभिद्य च ।
क्लवणेन खनेत् कूर्चं स्नात्वावभृथबुद्धितः ॥

दशाहं तर्पयित्वाथ वेदिकार(ा)धनञ्चरेत् ।
पुनःखननसंस्कारविधिरेष उदाहृतः ॥

No. 3067. प्रपन्नगतिदीपिका.

PRAPANNAGATIDĪPIKĀ.

Pages, 76. Lines, 7 on a page.

Begins on fol. 43*a* of the MS. described under No. 3063.

Regarding the state after death of a Prapanna, *i.e.*, of one who has undergone the ceremony of Prapatti, and has thus sought and found refuge in God.

Complete.

Contains an index at the end.

By Tātadāsa.

Beginning :

वरदं द्विरदाद्रीशं करुणावरुणालयम् ।
प्रपन्नजनतानन्दपारिजातमुपास्महे ॥

* * * *

लक्ष्मीकुमारतातार्यवंश्यवेदान्तलक्ष्मणः ।
तातदासो वितनुते प्रपन्नगतिदीपिकाम् ॥
हेमाद्रिर्माधवाचार्यो विज्ञानेश्वरयोगिराट् ।
चन्द्रिकाकृत्सार्वभौमो वैद्यनाथाख्यदीक्षितः ॥

* * * *

मृता भवन्त्वप्रपन्नाः प्रपन्ना वा प्रपन्नकैः ।
पुत्रैस्सपिण्डीकरणं न कार्यं सर्वथा द्विजैः ॥
सपिण्डीकरणात्तेषां प्रेतत्वोन्मुक्तिपूर्वकम् ।
वस्वादीनां नियाम्यत्वासिद्धेर्विज्ञानयोगिना ॥

End:

आचार्यदिव्यसूक्तीनामविरुद्धं तदेव हि ।
रोचते मम देवादिनाथस्संप्रीयतामितः ॥

* * * *

प्रमाणगुम्भैस्सस्नेहा देशिकोक्तिप्रवर्त्तिका ।
प्ररोपिता मया सम्यक् प्रपन्नगतिदीपिका ॥

No. 3068. प्रपन्नपितृनिरूपणम्.

PRAPANNAPITṚNIRŪPAṆAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 108*a* of the MS. described under No. 2938
Treats of the same subject as the above work.
Incomplete.

Beginning:

भविष्ये—

अनिरुद्धस्स्वयं ज्ञेयः प्रद्युम्नस्तु पिता स्मृतः ।
सङ्कर्षणस्तज्जनको वासुदेवस्तु तत्पिता ॥

इति निर्णयसिन्धूक्तेः । भारते मोक्षधर्मे

गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः ॥

End:

स्वसूत्रपरित्यागो न दोषायेत्याचार्यपादैरध्यवसितो भवतीति वैदिव धर्मनिरूपणे निरूपितम् ।

स्मृतिमुक्ताफले—

सप्तवाताहतं वस्त्रं शुष्कवत्प्रतिपादितम् ।
आर्द्रं वापि द्विजातीनामाहृतं गौतमादिभिः ॥ इति ॥

No. 3069. प्रपन्नौर्ध्वदेहिकविधिः.

PRAPANNAURDHVADĒHIKAVIDHIḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 40*a* of the MS. described under No. 3051. Regarding the performance of the obsequial rites of a Prapanna. Incomplete.

Beginning :

अहो हि दुरनुष्ठेयो मोक्षधर्मस्सनातनः ।
यं हित्वा देवतास्सर्वा हव्यकव्यभुजोऽभवन् ॥ इति ।

तत्रैव—

गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः ॥

* * * *

नारदः—

कं त्वद्य यजसे देव पितरं कं न विद्म ते ।

नारायणः—

इन्द्रियैरिन्द्रियार्थैश्च सर्वभूतैर्विवर्जितम्(:) ।
स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते ॥
त्रिगुणव्यतिरिक्तोऽसौ पुरुषश्चेति कल्पितः ।

* * * *

आवाभ्यां पूज्यतेऽयं हि दैवे पित्र्ये च कल्प्यते ।
नास्ति तस्मात्परोऽन्यो हि पिता देवोऽथ वा द्विज ॥
दैवं पित्र्यं च कर्तव्यमिति तस्यानुशासनम् ।

End :

गृह्यकारैरनुक्तं यत् तत्र तत्र महर्षिभिः ।
तदनित्यमिति ज्ञेयं स्मृत्युक्तमपि सूरिभिः ॥

सुधीविलोचने—

सूत्रानुक्तानि स्मृत्यन्तरोक्तानि पाक्षिकाणि नावश्यकार्याणीति । शिष्ट्वा तु प्रतिषेधस्स्यादिति दाशमिकाधिकरणे वैकल्पिकानामननुष्ठानं नित्यमनुष्ठानन्तु काम्यमिति.

No. 3070. ब्रह्ममेधाध्यायः.

BRAHMAMĒDHĀDHYĀYAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 20*a* of the MS. described under No. 3051.

Regarding a special obsequial ceremony performed in the case of the death of a Prapanna.

Incomplete.

Beginning :

हारीतस्मृतौ षष्ठेऽध्याये—

पिता वा यदि वा माता भ्राता वान्यस्सुहृज्जनः ।
यदि पञ्चत्वमापन्नः कथं कुर्याद्द्विजोत्तमः ॥
कनिष्ठवर्जमेवात्र वपनं मुनिभिः स्मृतम् ।
स्नात्वाचम्य विधानेन कारयेत्पूजनं हरेः ॥
वस्त्रैराभरणैः पुष्पैर्गन्धैर्धूपैर्मनोरमैः ।
फलैर्भक्ष्यैश्च ताम्बूलैर्भक्त्या सम्यक् प्रपूजयेत् ॥
ब्राह्मणान् भोजयेच्छक्त्या गोहिरण्यादिभिस्तथा ।
अनुज्ञातस्तु गुरुभिर्ब्रह्ममेधं विधानतः ॥
विशिष्टैर्ब्राह्मणैस्सार्धं कुर्याद्वर्णोचितं यथा ।
सर्वतो मङ्गळं कुर्याद्रम्भवल्लयादिभिर्गृहे ॥
तोरणैश्च वितानैश्च यथारम्यं शुभावहम् ।
रोदनं वर्जयित्वैव सर्वं कुर्वीत वैष्णवः ॥

End:

एकं वा भोजयेद्विप्रं महाभागवतोत्तमम् ।
श्रुतिस्मृत्युदितं धर्मं विशिष्टाद्यस्समाचरेत् ॥
वैष्णवं परमं धर्मं महाभागवतोत्तमः ।
तस्मिन् सम्पूजिते विप्रे सर्वं सम्पूजितं जगत् ॥
तस्माद्भागवतश्रेष्ठमेकं वापि सुपूजयेत् ।
हरिश्च देवताश्चैव पितरश्च महर्षयः ॥

No. 3071. मृतभर्तृकासीमन्ताविधिः.

MṚTABHARṬṚKĀSĪMANTAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 70*a* of the MS. described under No. 2840.

Complete.

Regarding the rules for the performance of the Sīmantōnnayana ceremony in the case of a woman who loses her husband before such ceremony. Ordinarily this ceremony is performed at an advanced stage of a woman's first pregnancy.

Beginning:

आद्यगर्भे तु संप्राप्ते पश्चाद्भर्ता मृतो यदि ।
तिलोदकं च गृह्णाति दशाहं तु विधीयते ॥
स्मृत्युक्तकाले कर्तव्याः सीमन्तोन्नयनक्रियाः ।
तद्वत्पुंसवनं चैव ह्युक्तो(क्ते) काले तथैव च ॥

End:

अकृत्वा पुत्रजनने कुम्भस्य पुरतस्स्थितम् ।
पुत्रं च शेषकर्माणि कारयेत्तु यथाविधि ॥

Colophon:

इति मृतभर्तृकायास्सीमन्ताविधिः ॥

No. 3072. यतिसंस्कारविषयः.

YATISAṀSKĀRAVIṢAYAḤ.

Page. 1. Lines, 5 on a page.

Begins on fol. 50*a* of the MS. described under No. 3029.

Regarding the funeral ceremonies relating to the death of Yatis or Hindu ascetics.

Incomplete.

Beginning:

भिक्षोर्दशाहमध्ये तु सूतकं यदि जायते ।
सापिण्ड्यान्तं नु(स)माप्याथ भिक्षोः कार्या पुनः क्रिया ॥

End:

आसन्ने सङ्कटे विद्वान् देशकालाद्यचिन्तयन् ।
अपि स्वकर्तृकाशौच(ची)प्रव्रजेत क्षणात् गृहात् ॥

No. 3073. वपनविधिः.

VAPANAVIDHIḤ.

Pages, 5. Lines, 4 on a pege.

Begins on fol. 83*b* of the MS. described under No. 2973.

Regarding how one should get shaved when one has to perform obsequial ceremonies.

Complete.

Beginning:

कृत्स्नस्य केशपक्षस्य विप्रस्योद्ग्रन्थने श्रुतिः ।
शिरसां वपनं दाहादूर्ध्वं तदनुभाविनाम् ॥

अन्ये च—

पुत्राणां वपनं भवेत् पितृमृतौ जीवे पितर्यग्रजे
प्रेते तत्सहजेष्वनुप्रभव एवाग्निं दिशेत् क्षौरवान् ।

नान्येषां वपनं परं पितृमृतेज्ये(ज्यें)ष्ठे विपन्ने सति
भ्रातृणां वपनं हि नाग्निदमृतेऽन्येषां निमित्ते सति ॥

End:

सूर्यस्य(स्त)मयात् पूर्वं संकल्पं कुरुते यदि ।
रात्रौ तु दहनं कुर्याद्वपनन्तु परेऽहनि ॥

* * * *

गङ्गायां भास्करक्षेत्रे मातापित्रोर्मृतेऽहनि ।
आधाने यज्ञकाले च वपनं षट्सु विधीयते ॥

वापयेयुश्च ते सर्वे कनिष्ठा दशमेऽहनि ।
ज्ञातयस्ससमादर्वाक् कर्तृभिस्सह सर्वदा ॥

* * * *

श्राद्धानि चापुत्रककर्मकाणि दशाहमध्ये विहितानि यानि ।
आद्यादि सर्वाणि समन्त्रकाणि उक्तो मुनीन्द्रैस्सविशेष एषाम् ॥

No. 3074. वृषोत्सर्जनम्.

VṚṢŌTSARJANAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 41*a* of the MS. described under No. 2840.

Rules for the ceremony of setting a bull at large on the 11th day after death.

Complete.

Beginning:

पौर्णमास्यान्तु कर्तव्यं वैशाख्यामपि वा वृषम् ।
उत्सृजेल्लक्षणोपेतं देवर्षिपितृतृप्तये ॥

जीववत्सा बहुक्षीरा परिपूर्णाङ्गशोभिनी ।
या गौस्तदात्म(दीयं)नीलं वा बभ्रां(भ्रुं) पिङ्गलमेव वा

End:

अयने विषुवे वापि मातापित्रोर्मृतेऽहनि ।
धर्मार्थं वा पुण्यदिने पौर्णमास्यां विशेषतः ॥
इत्याह भगवानेतच्छौनको मुनिपुङ्गवः ।

No. 3075. वैष्णवप्राक्रिया.

VAIṢṆAVAPRAKRIYĀ.

Pages, 38. Lines, 6 on a page.

Begins on fol 1*a* of the MS. described under No. 3051.

Rules regarding the performance of obsequies in accordance with the doctrines of the Vaiṣṇavas.

Complete.

Vēdacūdālaksmaṇa is the author of this work.

Beginning :

आचार्यान् प्रणिपत्य देशिकमुखान् श्रीवैष्णवानां परे-
तानां कृत्यमनामयं भगवतस्सम्यक् समाराधनम् ।
श्रीमद्वेदवतंसलक्ष्मणपदप्रख्यातनाम्ना मया
दासेनाद्य विरच्यते भगवतः प्रीत्यै यथाशास्त्रतः ॥
नास्माकं शब्दशास्त्रे परिचय उदितो नैव साहित्यशास्त्रे
शास्त्रे न्यायेऽपि किंचिन्न कवनविषये नापि शक्तिस्तथापि ।
ग्राह्यं स्यादर्थमात्रं जगति हि सकलं यस्य शास्त्रे विचारो
नो शब्दानां हि कार्यः स्मृतिरवदादिति स्मात्र चाप्येवमेव ॥
सर्वे देहावसाने प्रदहनजनितक्षुत्तृडत्यन्तदुःख-
प्राप्तिप्रेतत्वमेत्य प्रबलतरभयश्चापि संप्राप्नुवन्ति ।
नित्यं पुत्रादिदत्तैः तिलवसनजलैः पिण्डदानैर्दशाहं
मूर्द्धाद्यङ्गं समेत्य क्षुदुपशमनमायान्ति बल्यर्पणेन ॥

* * * *

विज्ञानेश्वरे(रीये)—

प्रेतत्वञ्च क्षुत्तृष्णाजनितात्यन्तदुःखानुभा(भवा)वस्थेति ।

सुधीविलोचने—एकोत्तरवृद्धिनवश्राद्धोदकदानैः दाहजनितक्षुत्तृष्णा-निवृत्तिः, पिण्डैराकारप्राप्तिः, एकोद्दिष्टेन पिशाचत्वनिवृत्तिः ।

End:

निर्णयसिन्धौ भविष्ये—

अनिरुद्धः स्वयं ज्ञेयः प्रद्युम्नश्च पिता स्मृतः ।
सङ्कर्षणस्तज्जनको वासुदेवस्तु तात्पिता ॥

मूढं प्रपञ्चमिदमज्ञतया समस्तं
जानाति कश्चिदपि नो परमार्थमेतत् ।
यस्माद्गतानुगतिकं प्रतिभाति सर्वं
साङ्केत्यपञ्जरनिबद्धमनीशमद्धा ॥

* * * *

ज्ञात्वा साङ्केत्यतो यो वै गूहते वास्तवार्थकम् ।
तदेवान्तःकण्ठहरमामसूरणभक्षवत् ॥
वेदचूडालक्ष्मणाख्यदासेनाद्य यथामति ।
वैष्णवप्राक्रिया सेयं निर्णीता श्रीशतुष्टये ॥

No. 3076. वैष्णवप्राक्रिया.

VAIṢṆAVAPRAKRIYĀ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 24*a* of the MS. described under No. 305.

Complete.

Contains only the text.

No. 3077. श्राद्धतर्पणविषयः.
ŚRĀDDHATARPAṆAVIṢAYAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 17*a* of the MS. described under No. 2973

Regarding the offering of oblations of water in connection with Śrāddhas.

Complete.

Beginning :

पक्षश्राद्धे हिरण्ये च अष्टके वृद्धिसंज्ञिके(ते) ।
पूर्वं श्राद्धं प्रकुर्वीत पश्चाच्च पितृतर्पणम् ॥
दर्शे पाते च संक्रान्तौ युगमन्वन्तरादिषु ।
तर्पयित्वा पितॄन् पूर्वं पश्चाच्छ्राद्धं समाचरेत् ॥
सपिण्डीकरणश्राद्धे पित्रोश्चैवानुमासिके ।
अपरेऽह्नि प्रकुर्वीत तिलयुक्तं तु तर्पणम् ॥

End :

सपिण्डीमासिकी(के) यावन्न ददाति जलाञ्जलीन् ।
तावत्तिष्ठन्ति पितरः पुनः प्रेतत्वशङ्कया ॥
विद्यमाने तु पितरि माता यदि विपद्यते ।
मातुश्श्राद्धं सुतः कुर्यात् न कुर्याच्छेषतर्पणम् ॥
अमामनुयुगाक्रान्तिधृतिपातसमन्विताः ।
अन्वष्टकाश्च तिथयः षण्णवत्यः प्रकीर्तिताः ॥

No 3078. श्राद्धनिर्णयः.
ŚRĀDDHANIRNAYAḤ.

Substance, palm-leaf. Size, 16½ × 1½ inches Pages, 52 Lines, 6 on a page. Character, Grantha Condition, injured Appearance, old.

Regarding the circumstances under which the various kinds of Śrāddha ceremony are to be performed.

Wants beginning and end.

Beginning:

. . . . . जगत् ।
तस्मान्मां पूजयेत्तत्र शुचिस्सम्यगुपोषितः ।
ब्राह्मणान् भोजयेद्भक्त्या ततो दद्याच्च दक्षिणाम् ॥
हिरण्यं मेदिनी(नीं) गावो (गाश्च) वासांसि कुसुमानि च ।
यद्यदिष्टतम(मं) तत्तत्कृष्णो मे प्रीयतामिति ॥

End:

आमश्राद्धासम्भवे तु हेमश्राद्धमाह व्यासः—
"द्रव्याभावे द्विजाभावे प्रवासे . . . .
(हेम)श्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला ॥" इति ॥
अत्राप्यामश्राद्धोक्ता विशेषा यथासम्भवमनुसन्धेयाः । हेमद्रव्यालाभेऽप्य . . . . . .

No. 3079. श्राद्धनिर्णयदीपिका.

ŚRĀDDHANIRṆAYADĪPIKĀ.

Pages, 41. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 3059.
Deals with the same subject as the above work.
Complete.
By Tirumalakavi of a Parāśara-family.

Beginning:

मन्वादौ तर्पणमुक्तं कालादर्शे—

मन्वाद्यासु युगाद्यासु प्रदत्तस्सलिलाञ्जलिः ।
सहस्रवार्षिकीं तृप्तिं पितॄणामावहेत्पराम् ॥ इति ।

मत्स्यपुराणेऽपि—

पानीयमप्यत्र तिलैर्विमिश्रं दद्यात् पितॄणां प्रयतो मनुष्यः ।
श्राद्धं कृतं तेन समास्सहस्रं रहस्यमेतत् पितरो वदन्ति ॥

* * * *

एको वा बहवो वापि पुत्राः पित्रोर्यथाविधि ।
कृत्वाब्दिकं तु तैः कार्यं परेऽहनि तिलोदकम् ॥

End:

एवं दर्शादिनामत्तषु मुख्यकल्पेन श्राद्धानुष्ठानाशक्तौ तत्प्रतिनिधीनां हिरण्यश्राद्धानन्तरविकल्पितानां गोग्रासदानक(प)क्षोपोषणप्रभृतीनां मध्ये तर्पणरूपस्य प्रतिनिधेरनेकजानपदवृद्धपरम्पराप्राप्तत्वेन परमादरविषयतयावश्यानुष्ठेयत्वं बहुभिः प्रमाणैः प्रागेव बहुधा प्रपञ्चितमिति सर्वैः प्रामाणिकैः अवश्यमङ्गीकर्तव्यम् ॥

दक्षिणामूर्तिभक्तेन तिर्मलेन विपाश्चिता ।
शुश्रूषुस्वान्तशुद्धान्तसन्देहध्वान्तशान्तये ॥
सत्पात्रपूर्णस्नेहार्द्रविवक्षादशयान्विता ।
जीयादुद्योतिता सेयं श्राद्धनिर्णयदीपिका ॥

Colophon:

श्रीदक्षिणामूर्तिप्रसादसमासादितसाहित्यविद्यासंप्रदायस्य
पराशरकुलकासारकैरवाङ्कुरस्य तिर्मलकवेः
र्यशोदीपिका सन्देहतिमिरमणिदीपिका
श्राद्धनिर्णयदीपिका संपूर्णा ॥

लिखिता स्वेन रचिता श्राद्धनिर्णयदीपिका ।
अनुगृह्णन्तु मां सर्वे धर्मशास्त्रविशारदाः ॥

No. 3080. श्राद्धब्राह्मणादिनियमः.

ŚRĀDDHABRĀHMAṆĀDINIYAMAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 72*a* of the MS. described under No. 1165.

Regarding the selection of the Brahmins who are to be specially chosen and fed on the occasion of Śrādha ceremonies.

Incomplete.

Beginning:

अथ श्राद्धब्राह्मणसङ्ख्यानियमः कारिका—

शुचीन्निमन्त्र्य द्वौ दैवे त्रीन्विप्रान्पितृकर्माणि ।
दैवे पित्र्येऽथवैकैकं सपिण्डीकरणं विना ॥
श्राद्धं षोडशिकं देयं कन्य(ा)स्थो यदि भानवा(नुमा)न्
अफलं तु पृथक् श्राद्धमकन्यास्थे रवौ भवेत् ॥
अकन्यागतके ब्रह्मे पृथक् कार्यं करोति यः ।
स मूढो नरकं यान्ति(ति) कालसूत्राभिधं द्विजः ॥

End:

आचार्यदक्षिणां दद्यात् गोदानं च स्वशक्तितः ।
होमं चापि प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा ॥
दानं च शक्तितो दद्यात् यदिच्छेदात्मनो हितम् ।
सूर्यग्रहे सूर्यनामयुक्तान्मन्त्रांश्च कीर्तयेत् ॥
अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत् ।
न तस्य ग्रहणे दोषः कदाचिदपि जायते ॥

No. **3081.** श्राद्धवमनोच्छिष्टसंसर्गप्रायश्चित्तम्.

ŚRĀDDHAVAMANŌCCHIṢṬASAMSARGAPRĀYAŚCITTAM.

Pages, 14. Lines, 4 on a page.

Begins on fol. 86*a* of the MS. described under No. 2973.

Regarding certain purificatory ceremonies to be performed, when food is rendered impure by vomitting or other causes during the conduct of the ceremony of Śrāddha.

Incomplete.

Beginning:

श्राद्धे वमनविषयम्—

प्रेतश्राद्धे तु भुञ्जाने(न)विप्रस्य वमनं यदि ।
यत्ये कृष्णेति(?) मन्त्रेण होमं कुर्याद्यथाविधि ॥

इदं वचनमाद्यमासिकविषयम् ।

षोडशश्राद्धभुञ्जाने(न)ब्राह्मणोन्मुखनिस्रज(स्सृत)म् ॥

* * * *

उच्छिष्टोच्छिष्टसंस्पृष्ट्या त्यक्त्वा पात्रं (पुरातनम्) ।
पुनः पात्रेण भोक्तव्यं कर्तव्यं मनुरब्रवीत् ॥
श्राद्धकाले तु यो भुङ्क्ते ब्राह्मणो ब्राह्मणं स्पृशेत् ।
तदन्नमत्यजन् भुक्त्वा गायत्र्यष्टशतं जपेत् ॥

End:

मासिकं चो(सो)दकुम्भं च यद्यनन्तरितं भवेत् ।
तदुत्तरेण सा(स्वा)तन्त्र्यादनुष्ठेयं प्रचक्षते ॥

ऊनश्राद्धम्—

त्रैपक्षिकोनषाण्मासिकोनाब्दिकमथाचरेत् ।
एतेषामन्यकाले तु न पुनः करणं स्मृतम् ॥

* * * *

कृते सपिण्डीकरणे स्वपित्रोः न ब्रह्मचर्यं परिरक्षणीयम् ।
सुरक्षिते चापि महत्फलं स्यान्निवर्तते चेत्खलु नैव दोषः ॥

पार्वणश्राद्धप्रायश्चित्तम्—

लौकिकैर्वैदिकैर्वापि संसर्गे तत्र किं भवेत् ।
न विभागश्चतुर्होतेत्ययाश्च जुहुयात्ततः ॥
श्राद्धकाले तु यो भुङ्क्ते ब्राह्मणो ब्राह्मणं स्पृशेत् ।
तदन्नमत्यजन् भुक्त्वा गायत्र्यष्टशतं जपेत् ॥

No. 3082. श्राद्धविधिः.
ŚRĀDDHAVIDHIḤ.

Pages, 27. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 430.

Treats of the Śrāddha ceremony.

Beginning:

द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ।
भोजयेत्सुसमृद्धोऽपि न प्रसज्येत विस्तरः(रे) ॥
अष्टकासु च वृद्धौ च गयायां च मृतेऽहनि ।
मातु(ः)श्राद्धं पृथक् कुर्यादन्यत्र पतिना सह ॥
यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् ।
अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च ॥
देवतायतने कृत्वा तत्र श्राद्धं प्रकल्पयेत् ।
प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणः ॥
मातामहानामप्येवं तन्त्रं वा वैश्वदैविकम् ।
मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः ॥

End:

दर्व्यामुपस्तीर्य, उत्तरार्धात् स्विष्टकृते सकृदवदाय, मांसो(सौ)दन-पिष्टान्नं चावदाय, द्विरभिघार्य, अग्नये स्विष्टकृते स्वाहा——अग्नये स्विष्ट-कृत इदम् ।

अन्नाभिमर्शनादिशेषं मासिश्राद्धवत्कर्तव्यमेवेत्यर्थम(ः) ॥

Colophon:

अष्टका समाप्ता ॥

No. 3083. श्राद्धविषयवचनानि.
ŚRĀDDHAVIṢAYAVACANĀNI.

Pages, 8. Lines, 5 on a page.

Begins on fol. 43*a* of the MS. described under No. 2785.

Extracts relating to the ceremony of Śrāddha

Incomplete.

Beginning:

द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ।
यदनुग्रहतस्सन्ति न सन्ति यद(दु)पेक्षया ॥

स्नान(म्) । स्मृति(:) ।
आद्ये नम्ने नवश्राद्धे पाथेयं (ये च) सपिण्डकृत् ।
षण्मासिका(सा)भ्यन्तरन्तस्य मुखं दर्शनवर्जयेत् (वर्जयेन्मुखदर्शनम्) ॥
एकोद्दिष्टन्तु(ष्टे तु) षण्मासं सापिण्ड्ये च त्रिमासकम् ।
मासिके मासमेकन्तु आब्दिके च दिनत्रयम् ॥

End:

सिन्धुस्नानं गयाश्राद्धं वपनं प्रेतधारणम् ।
पर्वतारोहणञ्चैव न कुर्याद्गर्भिणीपतिः ॥
क्षौरं शवानुगमनं नखकृन्तनञ्च चौळञ्च वास्तुकरणं नद[न्तु]पूर्वयात्रा ।
उद्वाहमम्बुधिजलं न दु(सु)दूरयात्रा आयु(:)क्षयो (भवति) गर्भिणिकापतीनाम् ।
नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन ।
नोपरिस्थं न वारिस्थं न मध्यं नभसो गतम् ॥

No. **3084.** श्राद्धादिनिर्णयः.

ŚRĀDDHĀDINIRṆAYAḤ.

Pages, 80. Lines, 8 on a page.

Begins on fol. 34*a* of the MS. described under No. 3028.
A work on Srāddhas.
With a Tamil commentary.

Beginning:

अशक्तोऽपि मुमूर्षुश्चेत्प्रायश्चित्तादिकर्मणि ।
त्रारुणं सम्परित्यज्य मन्त्रादिस्नानमाचरेत् ॥

* * * *

वैद्यनाथीये—

वारुणस्नाने अशक्तो मुमूर्षुर्मन्त्रादिस्नानमाचरेत् ।

याज्ञवल्क्यः—

असामर्थ्याच्छरीरस्य वैषम्याद्देशकालयोः ।
स्नानान्येतानि तुल्यानि मन्त्रादीनि यथाबलम् ॥
मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च ।
मानसं यौगिकं चेति मन्त्रस्नानान्यनुक्रमात् ॥ इति ।
ऊर्ध्वपुण्ड्रमवश्यं तु मुमुक्षोर्धार्यमेव हि ।

* * * *

वैद्य - मरीचिः —

सर्पं दृष्ट्वा यथा लोके दर्दुरा भयविह्वलाः ।
ऊर्ध्वपुण्ड्राङ्कितं तद्वत्कम्पन्ते यमकिङ्कराः ॥ इति ।

विष्णुः —

ऊर्ध्वपुण्ड्रधरो मर्त्यो म्रियते यत्र कुत्रचित् ।
श्वपाकोऽपि विमानस्थो मम लोके महीयते ॥ इति ।

End :

श्राद्धं चेत्समतीतं स्याद्विघ्नितं निश्चितं पुनः ।
तत्क्षणे वाथ दर्शे वा कृष्णपक्षे विशेषतः ॥
एकादश्यां तु वा कार्यमिति स्मृतिविभाषितम् ।

* * * *

लघुवैद्यनाथीये कनकसभापतिकारिकाव्याख्याने—

तदहर्विस्मृतं(ति) प्राप्तं(प्तौ) दर्शे वा तत्क्षणेऽपि वा ॥
श्राद्धविघ्ने समुत्पन्ने त्वविज्ञाते मृतेऽहनि ।
एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः ॥

तिथिरज्ञानवशात् गता चेत् स्मरणदिवसे वा तन्मासकृष्णैकादश्यां वा पित्रादिश्राद्धं कुर्यात् इति ।

सपिण्डीकरणान्ते च प्रेतकृत्ये कृते यदि ।
प्रायश्चित्तं ततः कुर्यादिति गौतमभाषितम् ॥

* * * *

गौतमः —

सपिण्डीकरणान्ते तु प्रायश्चित्तं तु गौतमः ।
पयोव्रतावगाहादि समुद्रमथ वा तथा ॥
सावित्रीं दशसाहस्रं जपेच्छुद्ध्यै द्विजोत्तमः । इति ॥

No 3085. श्राद्धाद्युपयुक्तवचनानि.

ŚRĀDDHĀDYUPAYUKTAVACANĀNI.

Pages, 42. Lines, 5 on a page.

Begins on fol 32*a* of the MS. described under No. 2968.

Extracts relating to Śrāddhas and other allied subjects.

Beginning:

विरिञ्चिना सहोत्पन्न प(मे)रुष(पृ)ष्ठे च निर्गतः ।
नुद पापानि सर्वाणि दर्भ स्वस्तिकरो भव ॥
पञ्चसप्तकुशैर्वापि कूर्चं कृत्वाथ निक्षिपेत् ।
पञ्चभिस्सप्तभिर्दर्भैर्नवमे(वै)कादश(भि)स्तथा ॥

* * * *

तीर्थश्राद्धे गयाश्राद्धे नित्यश्राद्धे तथैव च ।
संवत्सरविमोके च न कुर्यात्तिलतर्पणम् ॥

End:

मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् ।
मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमन्त्रितः(ता) ॥

आपो हि ष्ठा इति सूक्तम्.

No. 3086. श्राद्धीयस्मृतिवचनानि.

ŚRĀDDHĪYASMṚTIVACANĀNI.

Pages, 12. Lines, 8 on a page.

Begins on fol. 49*a* of the MS. described under No. 2824.

A collection of authorities from Smṛtis regarding the ceremony of Śrāddha.

Incomplete.

Beginning:

पितामहपितुः पित्रोः तत्पत्यो(त्न्यो)रग्रजस्य च ।
एतेषां पार्वणं कुर्यात् नास्ति चेत् ब्रह्मघातकः ॥

एकोद्दिष्टे षोडशे च नित्ये नान्दीमुखेऽपि च ।
सपिण्डीकरणे चैव न कुर्यात्तिलतर्पणम् ॥

End:

विज्ञानेश्वरे(रीये)—

उदकं पिण्डदानं च प्रेतेभ्यो यत्र[ति]दीयते ।
नोपतिष्ठन्ति(ति) तत्सर्वमन्तरिक्षे विनश्यति ॥

No. 3087. श्राद्धीयस्मृतिवचनानि.

ŚRĀDDHĪYASMṚTIVACANĀNI.

Pages, 76. Lines, 8 on a page.

Begins on fol. 101*a* of the MS. described under No. 2824.

Incomplete.

Beginning:

रौद्रश्चैत्रश्च मैत्रश्च तथा सारटकस्स्मृतः ।
सावित्रश्च जयन्तश्च गान्धर्वः कुतपस्स्मृतः ॥

रौहिणश्च विरिञ्चश्च विजयो नैरृतस्तथा ।
माहेन्द्रो वरुणश्चैव भटः पञ्चदश स्मृताः ॥
ऊर्ध्वं मुहूर्तात्कुतपात् यन्मुहूर्तचतुष्टयम् ।
मुहूर्तपञ्चकं ह्येतत् स्वधाभुवनमिष्यते ॥
आज्यं गोमयसंयुक्तं पादयोर्लेपयेद्यदि ।
पितरस्तस्य कल्पान्तममृतेनाभिषेचिताः ॥
सर्वदा दर्भपाणिस्स्यादे(द्वै)वे पित्रे(त्र्ये) च कर्मणि ।
पादशौचं गन्धलेपं न कुर्याद्दर्भपाणिना ॥
दशकृत्वः पिबेदाप· गायत्र्या श्राद्धभुक् द्विजः ।
ततस्सन्ध्यामुपासीत होमं चापि यथाविधि[ः] ॥
निमन्त्रितो जपेद्धोग्ध्रीं नियुक्तस्तु निषङ्गिणीम् ।
विसृष्टो वामदेवाय श्राद्धभुक् दोषवर्जितः ॥

End:

आशौचमध्ये विधुसङ्क्षये च दद्युर्दशाहे तिलवारिपिण्डम् ।
पुत्रीसुतो ओ(वौ)रसदत्तपुत्रश्शेषास्सुतास्तत्र समापयेयुः ॥

No. 3088. सत्क्रियाकल्पमञ्जरी.
SATKRIYĀKALPAMAÑJARĪ.

Substance, paper. Size, $8\frac{3}{4} \times 4\frac{5}{8}$ inches. Pages, 10. Lines, 10 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is, Vēdāntasāra 9*a*.

Also regarding obsequies.

Deals with certain funeral rites as they are to be performed in relation to Prapannas. Complete.

Beginning:

सपिण्डीकरणनिषेधपूर्वकः ।

प्रपन्नानामप्रपन्नानां वा पुत्रैः प्रपन्नैस्सपिण्डीकरणं न कर्तव्यम्; तत्स्थाने नारायणबलिरेव कर्तव्यः; विज्ञानेश्वरीयादौ सपिण्डीकरणाप्रेतत्व-

निवृत्तिपूर्वकवस्वादिसम्बन्धप्राप्तिरित्युक्तेः । सम्बन्धश्च क इति विशेषाकाङ्क्षायाम् ?

वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ।
प्रीणयन्ति मनुष्याणां पितुः श्राद्धेन तर्पिताः ॥

इत्यत्र विज्ञानेश्वरेण वस्वादीनां मनुष्यपित्रदि(धि)ष्ठातृत्वोक्तेः ; पितृणामाधिपत्यत्वात्(त्याच्च) श्राद्धदेवः स्मृतो रविः इति मत्स्योक्तेश्च, अधिष्ठात्रधिष्ठेयभावस्सम्बन्धः इति निश्चितत्वात् । स्वपित्रादीनां वस्वादिनियाम्यतासिद्ध्यर्थं सापिण्ड्यानुष्ठाने स्वनिष्ठाहानेर्दुर्वारत्वात् ।

End:

तानि च कर्माणि हारीतादिभिर्विशदीकृतानि भवन्ति । स्वर्गतानामित्यत्र अर्हार्थे क्तः । सर्वेषाञ्चेति पापिनामपि ग्रहणम् । वैष्णवोत्तमैरिति न तदितरव्यावृत्त्यर्थम् ; अवैष्णवानामपि पूर्वोदाहृतप्रमाणैः तत्राधिकारसिद्धेः । अतः वैष्णवोत्तमैः अवश्यकर्तव्योऽयमिति आवश्यकतापरं तत् ।

यथा—

कांस्यं मांसं मसूरञ्च पुनर्भोजनमैथुनं(ने) ।
द्यूतमत्यन्नपानञ्च द्वादश्यां वैष्णवस्त्यजेत् ॥

इत्यादौ वैष्णवपदं, तद्वत् । तथा च पार्वणमर्थान्निवृत्तं भवतीति नारायणबलिमेव कुर्यादिति च फलितो भवति ।

तदेवं केवलं पिण्डसंयोजन . . पार्वणम् ।

वैष्णवव्यतिरिक्ताधिकारिकमिति सिद्धत्वात् वैष्णवैः नारायणबलिरेव कर्तव्य इति सिद्धम् ॥

Colophon:

इति सत्क्रियाकल्पमञ्जर्यां नारायणबलिविधिः ॥

तर्केभरागेन्दु (१७८६) मिते शाके भाद्रपदे सिते ।
पञ्चम्यां शुक्रवारे तु रुधिरोद्गारिवत्सरे ॥
लिखिता कृष्णरायेन(ण) सत्क्रियाकल्पमञ्जरी ॥

ग्रन्थाः १६०.

No. 3089. सत्क्रियाकल्पमञ्जरी.

SATKRIYĀKALPAMAÑJARĪ

Pages, 208. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2938.

Beginning :

श्रीपाञ्चरात्ररक्षायां सिद्धान्तस्थापनाधिकारे——

पूर्णोपादानं युक्तम् । अत एव हि हौत्रं होतृशाखोक्तमध्वर्यवोऽपि-परिगृह्णन्ति । अतो येषु सूत्रेषु भगवदर्चनादिकं प्रत्यपादि; तन्निष्ठा-नामपि भगवच्छास्त्रोक्तप्रक्रियया समाराधनादिकं प्रशस्ततमम्

* * * *

मानवस्मृत्युपजीव्यभगवच्छास्त्राविरोधे तेषां बाध्यत्वमेवेति चानुगृही-तम् ।

क्षीराम्भोध्यपराजितासितमणिद्वीपस्थलीभूषणं
निष्कामैस्सुहुतानि भक्तिविवशैर्हव्यानि कव्यानि च ।
मूर्ध्ना संप्रतिगृह्य सैन्धवशिरा भूत्वा पिबन् सादरं
साक्षात्सर्वजगत्पिता स भगवान् नारायणः पातु नः ॥

साक्षाद्भगवन्तमेवोद्दिश्य परमैकान्तिभिः पित्रादिप्रत्याब्दिकश्राद्धादी-न्यनुष्ठेयानि ।

श्रीमद्भगवद्गुणदर्पणे पराशरभट्टारकैः पवित्राणां पवित्रं चेत्यत्र देव-तानां पावनत्वं तदुपासनार्चनपादोदकसेवादिना प्रसिद्धम् ।

End:

ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं मया ।
तत्सर्वं पूर्णमेवास्तु सुतृप्तो भव सर्वदा ॥

इति प्रार्थ्य पितृयागभूतबलिदानानुयागान् प्रत्यहमिव कृत्वा पुंसूक्तं वा विष्णोर्नुकमिति वा मूलमन्त्रं वा यथाशक्ति भगवन्तं ध्यायन् जपित्वा रात्रावभुक्त्वा शुचौ भूतले उदगग्रान् दर्भानास्तीर्य शयीत ॥

Colophon:

इति सत्क्रियाकल्पमञ्जर्यां नारायणबलिप्रयोगः ॥

१. स्मृत्यपेक्षया पाञ्चरात्रस्य प्रामाण्यम्.
२. वस्त्रयज्ञोपवीतप्रामाण्यम्.
३. विच्छिन्नाग्निसन्धानम्.
४. यज्ञोपवीतप्रतिष्ठा.
५. सुदर्शनादिहेतिहोमः.
६. वैष्णवलक्षणम्.
७. प्रपन्नब्रह्ममेधसंस्कारः.
८. कर्मणां नित्यनैमित्तिकत्वव्यवस्था.
९. दर्शनिर्णयः.
१०. वैष्णवदैविककर्मविधिः.
शुक्लपक्षे द्वितीयां च (यायां) तृतीया(ये)पञ्चमी(मे)तिथौ ॥
त्रयोदशी च दशमी सप्तमी व्रतबन्धने ।
श्रेष्ठेश्वे(ष्ठाश्वै)कादशी षष्ठी द्वादश्येतास्तु मध्यमाः ॥
एकाश्चतुर्थीं सन्त्यज्य कृष्णपक्षेऽपि मध्यमाः ।
आ पञ्चम्यास्तु तिथयः पराः स्युरतिनिन्दिताः ॥

फलभागम्(:)—

षट्त्रिदशस्थो भानुः षड्दशजन्मत्रिसप्तगः(सु) सितांशुः ।
द्व्यष्टचतुर्दशषड्ज्ञो गुरुरद्रिद्विनवपञ्चमे शुभ[फल]दाः ॥

विषयाः—

१. शुभदैवज्ञलक्षणम्.
२. प्रथमार्तवातिथ्यादिफलम्.
३. पुंसवनकालः.
४. जातकर्मकालः.
५. कृष्णचतुर्दशीजननगण्डम्.
६. नामकरणम्.

७. कर्णवेधः.
८. अन्नप्राशनम्.
९. प्रथमशिरोरुहबन्धनम्.
१०. चौलम्.
११. अक्षरस्वीकरणम्.
१२. उपनयनम्.
१३. अनध्यायलक्षणम्.
१४. उपनयनकालः.

No. 3140. भुक्तिदीपिका.

BHUKTIDĪPIKĀ.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 23. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

Begins on fol. 16*b*. The other work herein is, Ṇatvadarpaṇa 1*a*.

A work regarding the time when food may be taken just before the occurrence of eclipses

Beginning :

उपरागे रवेरिन्दोन्य(र्य)त्र भोजनसंशयः ।
तत्र तन्नि(र्ण)यायैषा क्रियते भुक्तिदीपिका ॥

तत्र तावत्कानिचिद्वचनानि चन्द्रसूर्ययोर्ग्रहणे भोजनमेव निषेधन्ति—

"अहोरात्रं न भोक्तव्यं चन्द्रसूर्यग्रहो यदा" इत्यादीनि । कानिचिच्च तत्र भोजने प्रायश्चित्तविधानेन तन्निषेधमवगमयन्ति—

"चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति ।
तस्मिन्निह दिने भुक्त्वा त्रिरात्रेण विशुध्यति ॥" इत्यादीनि । कानिचन(त)त्र भोजनाभावस्यातिफलप्रदानेन तन्निषेधमुज्जीवयन्ति—

"अयने विषुवे चैव चन्द्रसूर्यग्रहे यथा ।
अहोरात्रोषितस्स्नातस्सर्वपापैः प्रमुच्यते ॥"

इत्यादीनि । उषितः उपोषित इत्यर्थः ।

End:

अस्तोदयव्यतिरिक्ते सर्वत्रापि सोमग्रहणे प्रामाणिकमेव प्रातर्भोजनमिति सर्वं समञ्जसम् । एतावता ग्रहणे भोजननिर्णयः कृतः ।

इदानीं तु तत्रैव प्रत्याब्दिकप्रसक्तौ तन्निर्णायायेदमुच्यते—

तत्र तावद्रात्रौ द्वितीयतृतीययामयोस्सोमग्रहे प्रातस्सङ्गवमध्याह्नापराह्णेषु च रविग्रहे नास्ति सन्देहः ।

* * * *

अथ स्यान्मृतदिनमात्रं श्राद्धकालः तत्रापराह्णे तद्विधानं नियमविधिरूपमवघातविधिवत्सम्पद्यते । तेन

* * * *

उपवासो यदा नित्यः श्राद्धञ्च प्रकृतं भवेत् ।
उपवासन्तदा कुर्यादाघ्राय पितृसेवितम् ॥
इति तन्नि(स्मि)त्रैव तद्विधानात् ॥

. . . . . नानां चैकादशीमाहात्म्यवर्णनपरतेति तन्निर्णयायोगाच्च । द्वादश्यामपि प्रातस्तदनुष्ठानमुक्तविरोधाच्छिष्टानुष्ठा . . . . . ॥

. . . . . विपश्चिता
निर्मिता विदुषां प्रीत्यै . . . भुक्तिप्रदीपिका ॥

No. 3141. मन्त्रोपदेशकालनिर्णयः.

MANTROPADĒŚAKĀLANIRṆAYAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 37*a* of the MS. described under No. 2886.

Treats of the efficacy of teaching particular Mantras at particular times.

Beginning:

अथ मासनियमः—

असिद्धिर्भूमिसम्पत्तिर्मरणं बन्धुनाशनम् ।
शुभप्राप्तिस्त्रा(स्था)ननाशस्सम्पत्ती रत्नसम्पदः ॥
ज्ञानप्राप्तिर्ज्ञाननाशो ह्यमोघार्थो वशीकृतिः ।
एवं चैत्रादिमासानां फलान्याहुर्मनीषिणः ॥

End:

शुद्धामुषसि बिन्द्वन्तां मध्याह्ने सर्गसंयुताम् ।
सायाह्ने मध्यरात्रे तु बिन्दुसर्गान्तमातृका(म्) ॥

शुद्धायां हक्षमध्यस्थात् वकारामित्यर्थः । सर्गा(र्ग्या)यां सर्गवर्णकम् बैन्दव्यां बिन्दुसंसर्गायां बिन्दुवर्णं परित्यजेत् स्थानीयत्वेनेति शेषः ॥

No. 3142. वृत्तरत्नप्रदीपिका.

VRTTARATNAPRADĪPIKĀ

Pages, 43. Lines, 7 on a page.

Begins on fol. 159*a* of the MS. described under No. 2938.

A work by Vātsya-Vēdāntadāsa regarding the proper time for breaking fast on the Dvādaśī or the twelfth lunar day in either fortnight in the month.

Beginning:

इदं च पारणं सूर्यमण्डलोदयमनपेक्ष्यैव तत्पूर्वमेव कार्यम्; कलाद्वयपर्याप्तद्वादशीसद्भावे द्वादशीकालमध्य एव पारणमिति हेमाद्रिग्रन्थेन कलाद्वयद्वादशीसत्त्वे पारणासमाप्तेरेव द्वादश्यतिक्रमेण कर्तव्यत्वप्रतीतेः ।

सन्ध्याकाले तु संप्राप्ते भोजनं कुरुते तु यः ।
सिक्थे सिक्थे भ्रूणहत्यां वदन्ति ब्रह्मवादिनः ॥

End:

परमैकान्तिभिश्शास्त्रविरुद्धान्धपरम्परागताचारपरित्यागपूर्वकं यथाशास्त्रं तत्तत्कर्माणि यथावस्थिततत्तत्स्वरूपज्ञानपूर्वकमेवानुष्ठातव्यमि(व्यानी)ति सिद्धं भवति ॥

Colophon:

इति श्रीवात्स्यवेदान्तदासेन कमलापतेः ।
सन्तोषायार्पिता कृत्वा वृत्तरत्नप्रदीपिका ॥

No 3143. श्रवणद्वादशीनिर्णयः.

ŚRAVAṆADVĀDAŚĪNIRṆAYAḤ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 24. Lines, 5 on a page. Character, Grantha. Condition, fair. Appearance, new.

Begins on fol. 19*b*. The other work herein is, Prapannaśrāddhaprayōga 1*a*.

A work by Gōpāladēśika on the determination of Śravaṇadvādaśī or the twelfth lunar day in the bright fortnight of the month of Bhādra, on which day the Nakṣatra happens to be Śravaṇa. It is a religious day of fast.

Complete.

Beginning:

अथ श्रवणद्वादशीनिर्णयः ।

(तत्स्वरूपं) तस्यामुपवासादेः कर्तव्यत्वं च उक्तं मात्स्ये—

"द्वादश्यां भाद्रशुक्ले तु नक्षत्रं श्रवणं यदि ।
उपोष्य (द्वादशीं तत्र) हरिमभ्यर्चयेन्नरः ॥" इति ।

तथा नारदीये—

"भाद्रे तु शुक्लद्वादश्यां नक्षत्रं श्रवणं यदि ।
श्रवणद्वादशी नाम सा प्रोक्ता मुनिपुङ्गवैः ॥

तीर्थस्नानं कृतं मन्त्रस्नानं से(वा)देवपूजनम् ।
श्राद्धान्यपि च तत्सर्वमनन्तफलदं भवेत् ॥"

End:

पूर्वेद्युर्विष्णुशृङ्खलायोगे उपवासं कृत्वा परेद्युः श्रवणद्वादश्यामप्युपवासः कर्तव्य इति विधानाच्च निरस्ता वेदितव्याः । एवं च दिनद्वये श्रवणद्वादशीयोगे दिनद्वयोर(येऽ)प्युपवासादिकं कर्तव्यमिति सिद्धम् ॥

Colophon:

इति गोपालदेशिककृतश्रवणद्वादशीनिर्णयः ॥

No. 3144. श्रवणद्वादशीनिर्णयः.

ŚRAVAṆADVĀDAŚĪNIRṆAYAḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 87*a* of the MS. described under No. 3117.

Complete.

Same work as the above.

Colophon:

इति श्रीमदात्रेयकृष्णार्यतनूजस्य तच्चरणकमलचञ्चरीकस्य श्रीमद्वेदान्तरामानुजयोगीन्द्रमहादेशिककटाक्षलब्धवेदान्तरहस्यजालस्य श्रीगोपालदेशिकस्य कृतिषु श्रवणद्वादशीनिर्णयस्सम्पूर्णः ॥

No. 3145. श्रवणद्वादशीनिर्णयः.

ŚRAVAṆADVĀDAŚĪNIRṆAYAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 3119.

Same work as the above.

Beginning:

निर्णयसिन्धौ—

एकादश्यां श्रवणद्वादशीयोगे सैवोपोष्या ।
एकादशी द्वादशी च वैष्णव्यमपि तत्र चेत् ।
तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् ॥
इति विष्णुधर्मोक्तेः ।

नारदीयेऽपि—

संस्पृश्यैकादशीं राजन् द्वादशीं यदि संस्पृशेत् ।
श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति ॥
उत्तराषाढसम्मिश्रा श्रोणा मध्याह्नगापि वा ।
आसुरी सैव तारा स्यात् हन्ति पुण्यं सनातनम् ॥

End:

उभयव्यापिनी ग्राह्या श्रोणा द्वादशिसंयुता ।
विश्वर्क्षसं - - - - - ॥

No. 3146. श्रीरामनवमीनिर्णयः.

ŚRĪRĀMANAVAMĪNIRṆAYAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 100*a* of the MS. described under No. 3117.

Complete.

A work by Gōpāladēśika on the determination of the anniversary of the birth-day of Śrī-Rāma.

Beginning:

अथ श्रीरामनवमीनिर्णयः—

श्रीरामनवम्यपि श्रीनृसिंहजयन्तीवत् त्रिमुहूर्तमष्टमीवेधरहितैव ग्राह्या । तत्र कटके श्रीरामाराधनं कृत्वा, उपोष्य, परेद्युरेव पारणं कर्तव्यम् । तथैवागस्त्यसंहितायाम्—

"चैत्रमासि नवम्यां तु शुक्लपक्षे रघूत्तमः ।
प्रादुरासीत् पुरा ब्रह्मन् परं ब्रह्मैव केवलम् ॥
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां तु दशम्यामेव पारणम् ॥"

End :

"पूजाकर्मणि सङ्ग्राह्या मध्याह्नव्यापिनी तिथिः ।
उपवासे व्रते चैव मुहूर्तत्रयगामिनी ॥"

इत्यादिविधानाच्च त्रिमुहूर्तवेधरहिता यत्किञ्चिन्नवम्यपि ग्राह्या ।

Colophon :

इति गोपालदेशिकविरचितश्रीरामनवमीनिर्णयस्सम्पूर्णः ॥

No. 3147. श्रीरामनवमीनिर्णयः.

ŚRĪRĀMANAVAMĪNIRṆAYAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 16*a* of the MSS. described under No. 3119

On the same subject as that of the above work.

Incomplete.

Beginning :

निर्णयसिन्धौ—

इयं च श्रीरामनवमी मध्याह्नव्यापिनी ग्राह्या ।

"चैत्रे शुद्धे तु नवमी पुनर्वस्वृक्षसंयुता ।
यदि मध्याह्नयोगेन महापुण्यतमा भवेत् ॥"

इत्यगस्त्यसंहितोक्तेः । तत्रैव—

"पुनर्वस्वृक्षसंयुक्ता सा तिथिस्सर्वसम्मता ।
केवलापि सदोपोष्या नवमीशब्दसङ्ग्रहात् ॥" इति ।

दिनद्वये मध्याह्नव्याप्तौ तदभावे वा पूर्वदिने पुनर्वस्वृक्षयुतामपि त्यक्त्वा परैव कार्या ।

End:

अगस्त्यः——

नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यान्तु दशम्यामेव पारणम् ॥
प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः ।
उपोषणं न कुरुते कुम्भीपाकेषु पच्यते ॥

श्रीवैखानसोत्तरतन्त्रे भृगुः——

नवमी त्वष्टमीविद्धा त्याज्या विष्णुपरायणैः ॥

* * *

उदये त्वष्टमी किञ्चित् नवमी सकला यदि ।
तस्यामुपवसेच्चेत्स धर्महानिमवाप्नुयात् ॥

No. 3148. सङ्करमृततिथिनिर्णयः.

SAṄKARAMṚTATITHINIRṆAYAH.

Pages, 8. Lines, 5 on a page.

Begins on fol. 113*a* of the MS. described under No. 2763.

Deals with the rules for determining the Tithi of a person's death for ceremonial purposes, when two Tithis happen to occur on the day of death.

Complete.

Beginning:

सायन्तन्यपरत्र (चे)न्मृततिथिस्सैवाब्दिके सासिके
सा ग्राह्या द्व्यपराह्णयोर्यदि तदा यत्राधिका सा मता ।
तुल्या चेदुभयापराह्णसमये पूर्वा न चेत्तद्वयोः
पूर्वैव त्रिमुहूर्तगास्तसमये नो चेत्परैवोचिता ॥

अस्यार्थः—मृततिथिर्यदि दिनद्वयेऽपि सायन्तन्यां वर्तते; तदा अपरत्र परदिने सायङ्काले विद्धम(I)ना आब्दिके मासिके च ग्राह्या। तथा च मनुः—

तिथिर्योदयमारभ्य सायाह्नं यदि संस्पृशेत् ।
प्रत्यब्दे मासिके चैव ग्राह्येति मनुरब्रवीत् ॥ इति ।

End:

एकभर्ता द्विभार्यश्च उभयोः पुत्रवर्धनम् ।
अग्निप्रदानकर्ता च ज्येष्ठपत्नीसुतोऽग्रजः ॥
मातृणाञ्च बहुत्वेऽपि तीर्थेऽपि च महालये ।
एकार्घ्यमेकपिण्डं स्यादेकब्राह्मणभोजनम् ॥

No. 3149. सङ्क्रान्तिनिर्णयः.

SAṄKRĀNTINIRṆAYAḤ.

Substance, palm-leaf. Size, 14¼ × 1 inches. Pages, 73. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are—Varadadēśikadaṇḍakam 38*a*, Varadadēśikagadyam 39*a*, Varadadēśikamaṅgalāśaṁsanam 42*a*, Varadadéśikapañcāśat 44*a*.

On the determination of the proper time for the performance of the religious ceremonies connected with Saṅkrānti, *i.e.*, with the passing of the sun from one zodiacal sign into another. Consists of extracts from many works.

Complete.

Beginning:

स्मृतिरत्नाकरलघुवैद्यनाथीयबृहद्वैद्यनाथीयस्मृतिसङ्ग्रहदीपिकाचारनवनीतसच्चरित्रसुधानिधिस्मृतिमाधवीयादिग्रन्थसमूहेषूक्तसङ्क्रान्तिनिर्णयप्रकाराः प्रत्येकं प्रत्येकमत्र सम्यग्विलिख्यन्ते ।

स्मृतिरत्नाकरे सङ्क्रान्तिनिर्णयः ।

वृद्धवसिष्ठः—

अयने द्वे विषुवे द्वे चतस्रष्षडशीतयः ।
चतस्रो विष्णुपद्यश्च सङ्क्रान्त्यो द्वादश स्मृताः ॥

विष्णुपद्यादिलक्षणं संज्ञाप्रकरण एवोक्तम् ।

मृगकर्कटसङ्क्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवे तु तुलामेषौ गोळमध्ये तयोः पराः ॥

End:

एकान्ते ते मया प्रोक्ताः कालास्सङ्क्रान्तिपूर्वकाः ।
नैतेषु विद्यते विघ्नमयनश्रा(श्वा)क्षसंज्ञकाः ॥
अश्रद्धयापि यद्दत्तं कुपात्रेभ्योऽपि मानवैः ।
अकालेऽपि हि तत्सर्वं सत्यमक्षयतां व्रजेत् ॥

Colophon:

इति सङ्क्रान्तिनिर्णयस्समाप्तः ॥

No. 3150. सङ्क्रान्तिनिर्णयः.

SAṄKRĀNTINIRṆAYAḤ.

Substance, paper. Size, 8¾ × 5½ inches. Pages, 6. Lines, 34 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

This is from the Smṛtimuktāphala.

Beginning:

श्रीवैद्यनाथदीक्षितीयनिबन्धनस्मृत्युक्तसङ्क्रान्तिनिर्णयः ।

तत्र आह्निकविषये प्रोक्तसङ्क्रान्तिनिर्णयः यथा—

सङ्क्रान्तिस्नानस्याकरणे प्रत्यवायमाह शातातपः—

सूर्यसङ्क्रमणे पुण्ये न स्नायाद्यदि मानवः ।
सप्तजन्मसु रोगी स्याद्दुःखभागी च जायते ॥ इति ।

स एव—

सङ्क्रान्त्यां यानि दत्तानि हव्यकव्यानि मानवैः ।
तानि तस्य ददात्यर्कस्सप्तजन्मसु निश्चितम् ॥

इति मेषादिषु द्वादशराशिषु क्रमेण सर्वतस्सञ्चरतः सूर्यस्य पूर्वस्माद्राशेरुत्तरराशौ प्रवेशस्सङ्क्रमणम् । तत्र स्नानाद्यङ्गभूतसङ्क्रान्तिकालस्य मुख्यस्यासम्भवात् तत्सम्बन्धिनौ पूर्वोत्तरकालौ गृहीतव्यौ । तदाह देवलः—

सङ्क्रान्तिसमयस्सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः ।
तद्योगादप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिता(ः) ॥ इति ॥

End:

तदितरसङ्क्रमेषु तु—

रात्रौ सङ्क्रमणे पुण्यं दिनार्धं स्नानदानयोः । इति विधानात् विकल्प इति कालादर्शानुसारिण आहुः ।

उक्तस्य स्नानदानादेः उक्तेष्वपि कालेषु विशेषमाह शातातपः—

कुर्यात्सदायने मध्ये विष्णुपद्यां विषूवति ।

No. 3151. सौरादिमानवचनानि.

SAURĀDIMĀNAVACANANI.

Pages, 22. Lines, 5 on a page.

Begins on fol. 55*a* of the MS. described under No. 2785.

On the solar and other measures of the year. Particularly relates to the intercalary lunar month.

चैत्रमासेऽमलत्वेन यदा षष्टचात्मको भवेत् ।
तदाद्यदिवसोऽब्दर्तुमासवारादिरिष्यते ॥

यस्मिन् संवत्सरे चैत्रमा(त्रे योऽ)सावाद्यदिनेश्वरः ।
स एवाब्दपतिः प्रोक्तो नापरः स्मृतिचोदनात् ॥

End :

तौ यथा—

यस्मिन्मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा ।
मलमासस्स विज्ञेयः सर्वकर्मबहिष्कृतः ॥

* * * *

अन्यदा तु स्फुटाधिमासस्तृतीये तृतीयेऽब्दे स्यात् । मलमासत्रितयन्तु कदाचिदेव स्यात् । यथातिशिवशाकीनन्तरं? कन्याधनुर्मीनमासेषु एतत्त्रयञ्च निन्द्यम् । निन्द्यतरो वाधिमासो गणितेनाप्यधिकत्वात् । यद्बार्हस्पत्येऽतिमासोऽतिदुष्टः स्यात् ॥

No. 3152. स्थालीपाकनिर्णयः.

STHĀLĪPĀKANIRṆAYAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 5*a* of the MS. described under No. 854.

Deals with the ceremony of Sthālīpāka.

Incomplete.

Beginning :

पर्वप्रतिपदोः पुच्छमहर्मानादिकं यदि ।
प्रातः प्रतिपदिष्टिः स्यात् नो चेत्पर्वणि सा भवेत् ॥

End:

प्राचीनावीत्यनुज्ञायाम(थ)कर्तोपवीतवान् ।
द्वितीयपरिषेकान्तमाचरेदिति निश्चयः ॥ इति विद्यारण्ये ॥

No. 3153. हरिदिनतिलकव्याख्या.

HARIDINATILAKAVYĀKHYĀ.

Pages 65. Lines, 6 on a page.

Begins on fol. 126*a* of the MS. described under No. 2438.

Incomplete.

A commentary on Vēdāntadēśika's Haridinatilaka, which is a work dealing with the Ēkādaśī fast.

Beginning:

गोभिर्यस्य प्रभा गोऽयं लोके श्रीहरिवासरः ।
वेदान्ताचार्यसूर्योऽसौ स्वान्तध्वान्तहरोऽस्तु नः ॥

श्रीमान् सर्वतन्त्रस्वतन्त्रो वेदान्तदेशिकमणिः श्रीश्रयःपतेरत्यन्तप्रियं द्वादशीव्रतं हेमाद्रिचन्द्रिकाकालादर्शकालनिर्णयादिनिर्णीतरीत्यानुष्ठितं चेदशास्त्रमासुरं कृत्स्नमित्यासुरं स्यात्तन्निर्णयस्य समीचीनन्यायसहकृतप्रमाणविरुद्धत्वादित्यभिसन्धाय स्वयमेव निर्णेष्यन् तदङ्गं मङ्गळमादावाचरति नित्ये काम्ये चेति । नियमगुणविधिप्राप्तमार्ग इत्यत्र—

कांस्यमांसमसूरांश्च पुनर्भोजनमैथुने ।
घृतमत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत् ॥
कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान् ।
शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियम् ॥

इति कौर्मस्कान्दाद्युक्तनिषेधशास्त्राणि नियमविधिपदे ;

तन्मन्त्रजपतद्ध्यानकीर्तनश्रवणादयः ।
उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः ॥

इत्यादिविधिशास्त्राणि गुणविधिशब्दे अभिप्रेतानि । मार्गशब्देनेह चरणौपाधिकत्वात्स्वरूपं लक्ष्यते । गोपायत इत्यस्य तत्कुलत्रयशेषो बोध्यः ।

एवं सम्पूज्य देवेशं द्वादश्यां पुरुषोत्तमम् ।
कुलत्रयं समुद्धृत्य याति विष्णोः परं पदम् ॥

इति पराशरस्मरणात् ।

End :

यत्तु "परदिनोपवासे सति त्रयोदश्यां पारणं प्रसज्येत तच्च निषिद्धम् । अतः पूर्वत्रैवोपवासः कार्यः" इति वैद्यनाथेनोक्तं तदयुक्तम् । अधिकद्वादशीकविद्धहीनायामुक्तप्रसङ्गाभावेन परत्रैवोपवासप्रसङ्गादिति दिक् ॥

(मू.)

नित्ये काम्ये च धर्मे नियमगुणविधिप्राप्तमार्गे निजाना-
माज्ञानुज्ञाक्रमे तद्विहरणमुपधीकृत्य गोपायते यः ।
तस्मिन् कस्मिंश्चिदाद्ये हरिदिनतुलसीद्वादशीभिः प्रसाद्यो(द्ये)
भद्राणामेकसेतौ भवतु भगवति श्रीसखे भावना नः ॥
त्रेधाधिक्यादिभेदाद्भवति तु नवधा तादृशद्वादशीतः
शुद्धा विद्धेति चाष्टादशतनुरुदिता सद्भिरेकादशी सा ।
आद्यायामुत्तरत्र व्रतविधिरुभयोस्याद्यवस्थाथ षट्सु
प्राच्यां द्वन्द्वे स तुर्ये परमिह नियति(:) स्यात्त्रिकैक्यं त्रिके स्यात् ॥

III. DIGESTS—(SPECIAL)

(6) VYAVAHĀRA.

The works under this sub-division relate to religious and civi laws.

No. 3154. कर्तृक्रमः.

KARTRKRAMAḤ.

Pages, 17. Lines, 6 on a page.

Begins on fol. 112*a* of the MS described under No. 2991.

On the determination of persons eligible for the performance of obsequial ceremonies.

Complete.

Beginning:

दौहित्रके भ्रातृसुते होमादिनियमो न तु ।
वाग्दानादेव सिद्धिः स्यादित्याह भगवानृषिः ॥

पुत्राभावे तु सपिण्डाः, मातृसपिण्डाः, शिष्याश्च दद्युरित्याविशेषेण सपिण्डानां कर्तृत्वप्रसक्तौ कर्त्रकर्तृणामनुक्रमः——पुत्रः, सपत्नीपुत्रः, पुत्रिकापुत्रः, दत्तः, पौत्रः, प्रपौत्रः, धनहारी.

End:

सति सन्निधौ मुख्यकर्तरि सम्यक् स्थिते गौणकर्त्रा न कार्यम् । तथा श्लोकः । आपस्तम्बः——

स्त्रीकर्तृत्वे तु पुरुषः क्रियाः कुर्याद्यथोचितम् ।
सगोत्रो वान्यगोत्रो वा तत्कर्तृत्वेन चोदिता(ः) ॥ इति ।

* * * *

संस्कारार्धं(र्थं) शरीरस्य यथाकालं यथाकुलम् ।
वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः ॥
पतिसेवागुणास्सर्वा नो गृह्यार्था निवीक्रियतेति(निरूपिताः) ।
इति ॥

No. 3155. कर्तृक्रमः.

KARTṚKRAMAḤ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 80*a* of the MS. described under No. 2914

Same work as the above.

No. 3156. दत्तकचन्द्रिका.

DATTAKACANDRIKĀ.

Pages, 26. Lines, 10 on a page.

Begins on fol. 89*a* of the MS. described under No. 1235.

Complete in 7 Prakaraṇas.

A treatise on adoption.

By Kubērapaṇḍita.

Beginning:

चन्द्रिकानुक्तसञ्जातसंशयध्वान्तचन्द्रिका ।
चन्द्रिकाला(र्था)नुभावेन कृता दत्तकचन्द्रिका ॥
मन्वादिवाक्यविवृतेषु विवादमार्गेष्व-
ष्टादशस्वपि मया स्मृतिचन्द्रि(का)याम् ।
कल्युक्तदत्तकविधिर्न विवेदितो यः
सर्वस्स चात्र विततो विवृतो विशेषात् ॥

तत्राह मनुः——

अपुत्रेण सुतः कार्यो याद्दक्ताद्दक्प्रयत्नतः ।
पिण्डोदकक्रियाहेतोः नामसङ्कीर्तनाय च ॥

अत्रिश्च——

अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिस्सदा ।
पिण्डोदकक्रियाहेतोः यस्मात्तस्मात्प्रयत्नतः ॥

अपुत्रेण अजातपुत्रेण मृतपुत्रेण वा ।
अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च ॥
इति शौनकसंवादात् ।

* * * *

Colophon :

प्रथमप्रकरणं समाप्तम् ॥

* * * *

इति दत्तकचन्द्रिकायां द्वितीयप्रकरणं समाप्तम् ॥

End :

अविधानविधानं यः परिगृह्णाति पुत्रकम् ।
विवाहविधिभाजन्तं न कुर्याद्धनभागिनम् ॥ इति ।

अन्यजातीयदत्तकस्यापि नांशभागित्वमित्याह——

यदि स्यादन्यजातीयो गृहीतोऽपि पितुः क्वचित् ।
अंशभाजं न तं कुर्यात् शौनकस्य मतं हि तत् ॥

इत्युक्तं दाय(प्रकरण)मित्यास्तां विस्तरः ॥

रम्ये(म्यै)षा चन्द्रिका दत्तपद्धतेर्दर्शिका लघुः ।
मनोरमा सन्निवेशैः अङ्गिनान्धर्मतारणी ॥

Colophon :

इति श्रीमहोपाध्यायश्रीकुबेरकृता दत्तचन्द्रिका समाप्ता ॥
इति सप्तमप्रकरणम् ॥

No. 3157. दत्तपुत्रविधिः.

DATTAPUTRAVIDHIḤ.

Pages, 47. Lines, 6 on a page.

Begins on fol. 23*a* of the MSS. described under No. 2787.

A work on adoption.

Complete.

Beginning:

दत्तपुत्रत्रैविध्ये सत्याषाढसूत्रद्वयं प्रमाणम् ।

नित्यानां[द्यामुष्याणां]द्यामुष्यायणानां द्वयोः । दत्तकादीनाञ्च द्यामुष्यायणवत् । सूत्रद्वयस्यायमर्थः—त्रिविधा दत्तकादयः—नित्यद्यामुष्यायणाः, अनित्यद्यामुष्यायणाः, केवलाश्चेति । [य]जन(क)प्रतिग्रहीतृभ्यामावयोरयं पुत्र इति सम्प्रतिवनास्ति(पन्नास्ते) नित्यद्यामुष्यायणाः । तेषामुत्तरत्रापि उपनयनादिसर्वकर्मसु उभयगोत्रप्रवरसम्बन्धः, उभयवर्गयोः श्राद्धकर्तृत्वं, भागार्हत्वञ्च, उभयवर्गयोरर्घ्यपिण्डसंयोजनञ्चास्ति । दत्तकादीनाञ्च द्यामुष्यायणवदिति द्वितीयसूत्रे चकारादनित्यद्यामुष्यायणसंज्ञिकदत्तकादयो गृह्यन्ते ।

End:

पुत्रदातृपरिग्रहादौ यथा पितुः स्वातन्त्र्यमस्ति; तथा मातुरपि स्वातन्त्र्यमस्तीत्याह शाकलकारिकायाम्—

भर्तरि प्रोषिते प्रेते पत्न्याश्चास्ति स्वतन्त्रता ।
विक्रये चैव दाने च तथा पुत्रप्रतिग्रहे ॥

सन्निधिस्थे पतौ नास्ति तद्भार्यायाः स्वतन्त्रता ।
सन्न्यस्ते पतिते पत्यौ कन्यादाने स्वतन्त्रता ॥

भारततात्पर्ये च——

माता यदि विषं दद्यात् पिता विक्रयते यदि ।
राजा हरति सर्वस्वं का तत्र परिवेदना ॥

Colophon :

इति दत्तपुत्रविधिस्समाप्ता(प्तः) ॥

No. 3158. दत्तपुत्रविधिः.

DATTAPUTRAVIDHIḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 79*a* of the MS. described under No. 291
Also on adoption.
Incomplete.

Beginning :

ग्रन्थान्तरे ।

दत्तपुत्रत्वे योग्याः——

वंशजानामभावे तु प्रशस्ताः पितृवंशजाः ।
तदभावे सुतं दत्तं बिभृयाद्विधिनेतरम् ॥

ज्ञातीनां कुलजातानामुत्तम(ा)ः परिकीर्तिताः ।
उत्तमा मातृकुलजाः मध्यमाः पितृगोत्रजाः ॥

स्वकल्पोक्तविधानेन दत्तपुत्रपरिग्रहः ।
उत्तमं द्वादशाहे तु दत्तस्य ग्रहणं शिशोः ॥

End :

यः प्रदत्तोऽपि पुत्रत्वं जातकादिविवर्जितः ।
नासौ गच्छति पुत्रार्थं कथं वा रिक्थमाग्भवेत् ॥

पिता जनयति(ते) देहं पुत्रेण स्वयमात्मनः ।
शिखाछेदे तु संप्राप्ते कुर्याद(द्द)र्भैः शिखां द्विजः ॥

चान्द्रायणद्वयं कुर्या[प्र]द्दा(प)येत्पञ्चगव्यकम् ।
ब्राह्मणान् भोजयेत्तत्र शतसङ्ख्यान् यथाविधि ॥

ततः कर्मसु सर्वेषु अधिकारी भवेन्नरः ।
उपाकर्मणि यद्धार्यमुपवीतन्तदुच्यते ॥
अनवं वा नवं वापि पुरातनमिह त्यजेत् ।

No. 3159. दत्तमञ्जरी.

DATTAMAÑJARĪ

Pages, 37. Lines, 5 on a page.

Begins on fol. 120*a* of the MS. described under No. 2991.

On adoption

Complete.

Beginning :

अथ दत्तपुत्रस्वरूपमाह—

दत्तस्तु द्विविधः स्वगोत्रः अन्यगोत्रश्च । अन्यगोत्रः प्रसिद्धः । स्वगोत्रे व्यवस्थामाह यावत्पर्यन्तं संबन्धो ज्ञायते तावत्पर्यन्तं ज्ञातित्वम् । ज्ञायत इति ज्ञातिः । यदा न ज्ञायते संबन्धादिकं तदा समानोदकास्सगोत्रास्सकुल्याश्च । सप्तपुरुषपर्यन्तं सपिण्डत्वं प्रागेव प्रपञ्चितम् ।

End :

अथानुमाने(ना)पि दत्तसन्ततेः पालकगोत्रेणैवोपनयनादिकं सेत्स्यति । दत्तपुत्रसन्ततिः दत्तपालकगोत्रप्रवरोपनयनसंस्कारमर्हति । दत्तपाल(क)प्रवरगोत्रोद्भवकन्याविवाहे निषेधोक्तिमत्त्वात् । या या दत्तपालकगोत्रप्रवरोद्भवकन्याव(वाहनि)षेधोक्त(क्ति)मती असावसौ दत्तपालकगोत्रप्रवरोद्भवोपनयनादिसंस्का(र)वती यथा देवरातगो(त्र) सन्ततिः । तथाचेयम् । तस्मात्तथेति ।

* * * *

आत्मानं पण्डितं मत्वा अवलेपाद्ददेत्तु यः ।
स महापातकी ज्ञेयस्सर्वकर्मबहिष्कृतः ॥ इति सर्वं समञ्जसम् ॥

श्रीकोड्डुरुकुलस्वामिवेङ्कटेशस्य तुष्टये ।
सर्वदा दत्तसिद्धान्तमञ्जरी ल(स)तु ध्रुवम् ॥

No. 3160. दत्तमञ्जरी.

DATTAMAÑJARI.

Pages, 35. Lines, 6 on a page.

Begins on fol. 87*b* of the MS. described under No. 2914.

Complete.

Same work as the above.

No. 3161. दत्तमीमांसा.

DATTAMĪMĀṂSĀ.

Pages, 31. Lines, 6 on a page.

Begins on fol. 64*a* of the MS. described under No. 2914.

Wants beginning.

Treats of adoption.

Complete.

By Nandapaṇḍita.

Beginning:

दत्तपुत्रसन्ततेरुपनयननिर्णयप्रमाणानि त्रीणि प्रत्यक्षानुमानशब्दरूपाणि । दत्तपुत्रसन्ततेः पालकगोत्रप्रवरेणोपनयनादिकृतं(तौ) प्रत्यक्षं दर्शयिष्यामः—

लोहितपुत्रश्शुनश्शेफः; स तु हरिश्चन्द्रेण विक्रीतोऽभूत्; विश्वामित्रेण संवर्धितश्च । तस्य शुनश्शेफसन्ततेरुपनयनादिसंस्कारः विश्वामित्रेणैव कृत इति भारते प्रत्यक्षम् ।

सङ्कृतिः पूतिमाषश्च शम्भुश्चापगवस्तथा ।
कुण्डिदो व्याघ्रपादश्च भारद्वाजसगोत्रजाः ॥

End:

बहूनामेकपत्नीनामेक एष विधिः स्मृतः ।
एका चेत्पुत्रिणी जाता सर्वासां पिण्डदस्तु सः ॥

दत्तपुत्रमीमांसायाम्—

पुत्रसङ्ग्रहणं कार्यं तथा(हि)विधिदर्शनात् ।
पित्रा दैवाज्ञया यद्वत्सत्यवत्यम्बिकाज्ञया ॥

Colophon:

इति दत्तमीमांसा समाप्ता ॥

No. 3162. दत्तमीमांसा.

DATTAMĪMĀṀSĀ.

Pages, 30. Lines, 6 on a page.

Begins on fol. 97*a* of the MS. described under No. 2991.
Complete.
Same work as the above.

No. 3163. दत्तमीमांसा.

DATTAMĪMĀṀSĀ.

Pages, 54. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 2790.
Incomplete. Wants beginning.
Same work as the above.

No. 3164. दत्तमीमांसा.

DATTAMĪMĀṀSĀ.

Pages, 38. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under No 2787.
By Nandapaṇḍita. Seems to be a different recension.
Complete.

Beginning:

दत्तपुत्रसन्ततेरुपनयननिर्णये प्रमाणत्रयाणि(यम्)—[प्रत्यक्षप्रमाणं] प्रत्यक्षमनुमानमागमश्च । दत्तपुत्रसन्ततेः पालकगोत्रप्रवरैरेव उपनयनं कर्तव्यम्; अस्मिन्नर्थे प्रत्यक्षप्रमाणमनुमानप्रमाणमागमप्रमाणं च वर्तते । तत्र प्रत्यक्षप्रमाणं दर्शयामः—

शुनश्शेफो रोहितकुमारः; तं हरिश्चन्द्रः क्रीत्वा स्थितः; विश्वामित्रश्शुनश्शेफं पालितवान् । शुनश्शेफसन्ततेस्सर्वस्या विश्वामित्रगोत्रप्रवरैरेव उपनयनादिसंस्काराः कृता इति भारतादौ प्रत्यक्षसिद्धम् ।

End:

एतदपि पित्राद्या(द्यनुमति)मूलकाविषयम्; न तु स्वतन्त्रेण । स्त्रियाः यावज्जीवं(वम)स्वातन्त्र्यमेव ॥

Colophon:

इति नन्दप्रणी(पण्डि)ताचार्यविरचिता दत्तपुत्रमीमांसा समाप्ता ॥

No. 3165. दत्तमीमांसा.

DATTAMĪMĀṂSĀ.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 56. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol 1*a*. The other works herein are, Dattaviṣaya 29*a*, Putrasvīkāraṇanirūpaṇa 49*a*, Dharmasētu 69*a*, Dattaviṣaya 102*a*.

Incomplete. Same work as the above.

No. 3166. दत्तमीमांसा.

DATTAMĪMĀṂSĀ.

Pages, 50. Lines, 5 on a page.

Begins on fol. 97*a* of the MS. described under No. 2696.

Incomplete.

Wants beginning and end.

No. 3167. दत्तरत्नाकरः.

DATTARATNĀKARAḤ.

Substance, paper. Size, 8½ × 1¼ inches. Pages, 100. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A treatise on adoption by Dharmarājādhvarīndra, son of Mādhavādhvarīndra and Jānakī, and grandson of Dharmarājādhvarin.

Copying is said to have been finished by Nallāñcakravarti Śēṣācāryar at 11 o'clock on the Caturdaśi day of the bright fortnight in the month of Siṁha in the year Plava.

Beginning :

चूडेन्दुनिष्यन्दिसुधानुषङ्गप्रोन्मीलदानन्दरसैकधाम्ने ।
गौरीसनाथाय नमोऽस्तु तस्मै न्यग्रोधभूमीरुहमूलधाम्ने ॥

मानवात्रेयविज्ञानेश्वरकालामृतादिकान् ।
दृष्ट्वा वरदराजीयचन्द्रिकादत्तसङ्ग्रहान् ॥
कालनिर्णयमुख्यांश्च दत्तमीमांसया सह ।
पर्यालोच्य यथाबुद्धि युक्तिसारान् परीक्ष्य च ॥
दत्तरत्नाकरं नाम कुर्वेऽहं विदुषां मुदे ।
तत्र तावत् प्रजया हि मनुष्यः पूर्णः

* * * *

पिता ऋणाद्विमुच्येत पुत्रस्य मुखदर्शनात् ।
पुत्रेण लोकान् जयति श्रुतिरेषा सनातनी ॥
पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते स्वयम् ।
तस्मात्पुत्र इति प्रोक्तः पूर्वमेव स्वयम्भुवा ॥
ऋणमसन्नयति ह्यमृतत्वञ्च गच्छति ।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥
इच्छन्ति पितरः पुत्रान् स्वार्थहेतून् यतस्ततः ।
उत्तमर्णाधमर्णाभ्यां मामयं मोचयिष्यति ॥
अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः ।
ऋणात्पिता मोचनीयो यथा न नरकं व्रजेत् ॥
नापुत्रस्य च लोकोऽस्ति श्रुतिरेषा सनातनी ।
पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते ॥

End:

द्वितीयो यथा—

दत्तज्येष्ठादेः पुत्रपौत्रादिपरम्परास्थितः पालकगोत्रमनुसृत्य जनकगोत्रात्प्रविष्टः । स च महापतित इत्युच्यते । स्वगोत्रं पृष्ठतः कृत्वेति वचनविषयः पूर्वोक्तः । तृतीयो यथा—

स्वयमेव गोत्रं पृष्ठतः कृत्वान्यगोत्रप्रविष्टो ज्येष्ठः । एवञ्च त्रिविधोऽप्यनित्यद्यामुष्यायण उपपादितः । इतोऽन्येऽपि दत्तद्यामुष्यायणाश्च बहुविधाः प्रत्यक्षादिप्रमाणासिद्धाः ॥

Colophon:

इति श्रीमण्डकुण्डाग्रहारनायकरत्नभूतमाधवाध्वरीन्द्रतनुजेन जानकीसोमपीथिनीगर्भशुक्तिमुक्तामणिना त्व (त)त्तादृग्बोधायनधर्मराजाध्वरिशिखामणि[ना]दौहित्रेण धर्मराजाध्वरिवरेण विरचितो दत्तरत्नाकरो विदुषां मुदमादधातु ॥

No. 3168. दत्तविषयः.

DATTAVIṢAYAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 102*a* of the MS. described under No. 3165.

Incomplete.

On the rights and duties of the adopted son.

Beginning:

निर्णयसिन्धौ—

दत्तकस्तु जनकस्य पुत्राद्यभावे श्राद्धं कुर्यात्, न तत्सत्त्वे।
गोत्ररिक्थे जनयितुर्न भर्जेद्दत्ति(त्रि)मस्सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपे(पै)ति ददतस्स्वधा ॥

इति मनूक्तेः । इदं जनकस्य पुत्रसत्त्वविषयम् ।

End:

भ्रातृपुत्रस्सपिण्डो वा सगोत्रो वेतरोऽपि वा ।
न देयो न प्रतिग्राह्यो यद्यसौ कः (न)प्रियो भवेत् ॥
स्तन्यदानविक्रयत्यागेषु मातापितरौ प्रभवतः ।

मुख्यतो मातुः, तदनन्तरं पितुः,

गर्भधारणपोषाभ्यां तेन माता गरीयसी ।

No. 3169. दत्तविषयः.

DATTAVIṢAYAḤ.

Pages, 40. Lines, 6 on a page.

Begins on fol. 29*a* of the MS described under No. 3165.

Similar to the above.

Complete.

Beginning:

महाभारततात्पर्यनिर्णये जरासन्धवाक्यम्—

दत्तपुत्रो ममायं हि औरसात्तु विशिष्यते ।
दत्तक्रीतादिपुत्राणां बीजवत्तुस्सपिण्डता ॥

पञ्चमी सप्तमी तद्वद्गोत्रं तत्पालकस्य च ।

अस्य श्लोकस्य गता . . . र्थं व्याख्यानम्—

क्षेत्रजस्य बीजवप्तुः पञ्चमी सप्तमी सपिण्डता यद्वद्बलवती; तद्वत् क्षेत्रपालकस्य गोत्रं बलवत् । अत्र चकार एवशब्दार्थः अव्ययानामनेकार्थत्वादिति प्रथमव्याख्यानम् ।

End:

सगोत्रमन्यगोत्रं वा दत्तं कुर्याद्यथाविधि ।
अन्यगोत्रेऽपि दौहित्रं भागिनेयं विशेषतः ॥
दौहित्रके भ्रातृपुत्रे होमादिनियमो न हि ।
वाग्दानादेव सिद्धिस्स्यादित्याह भगवान् यमः ॥

No. 3170. दत्तसिद्धान्तमञ्जरी.

DATTASIDDHĀNTAMAÑJARĪ.

Pages, 22. Lines, 6 on a page.

Begins on fol. 36*a* of the MS. described under **No. 1235.**

A work on adoption.

Complete.

Beginning:

वन्दे लक्ष्मीधरित्रीभ्यां सानुरागावलोकित[ा]म् ।
स्वयन्तथा ते वीक्षन्तं सस्मितं वेङ्कटेश्वरम् ॥
धर्मशास्त्रार्थतत्त्वज्ञान् प्रणम्यैतत्कृपाबलात् ।
दत्तसिद्धान्तमन्दारमञ्जरी क्रियतेऽधुना ॥

इह खलु पुत्रवान् परस्तदन्यस्त्वपर इति लोकवेदप्रसिद्धत्वात् पुत्रसङ्ग्रहणं कार्यम् ।

तथैवात्रिः—

अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिस्सदा ।
पिण्डोदकक्रियाहेतोः यस्मात्तस्मात्प्रयत्नतः ॥

इति । नापुत्रस्य च लोकोऽस्ति इति श्रुतिः ।

End:

अन्यगोत्राद्ग्रहीतव्यो मातुलादेस्तु मित्रतः ।
नाभिकृन्तनतः पूर्वं जायया सह शास्त्रतः ॥

दौहित्रके भ्रातृसुते होमादिनियमो न हि ।
वाग्दानादेव पुत्रत्वमिति शातातपोऽब्रवीत् ॥

समानप्रवरां कन्यां सपिण्डाञ्चैव गोत्रजाम् ।
नैव तां वरयेत्प्राज्ञो मातृवत्परिपालयेत् ॥

Colophon:

इति दत्तसिद्धान्तमञ्जरी सम्पूर्णा ॥

No. 3171. दिव्यावतारः.

DIVYĀVATĀRAḤ.

Substance, paper. Size, 16¾ × 11¼ inches. Pages, 368. Lines, 30 on a page. Character, Telugu. Condition, good. Appearance, new

Incomplete.

The text is accompanied by a Telugu commentary. This is a compilation made by the Pandits of the Madras College from the Vyavahārakāṇḍa of several Smṛtis. It treats of the various kinds of ordeals known to ancient Hindu Law.

Beginning:

याज्ञवल्क्यः—

"प्रमाणं लिखितं भुक्तिस्साक्षिणश्चेति कीर्तितम् ।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥"

* * * *

मिताक्षरायाम्—

एषां लिखितादीनां त्रयाणामन्यतमस्याभावे दिव्यानां वक्ष्यमाण-स्वरूपभेदानामन्यतमं जातिदेशकालद्रव्याद्यपेक्षया प्रमाणमुच्यते ।

* * * *

मानुषाभाव एव दिव्यस्य प्रामाण्यमस्मादेव वचनादवगम्यते । दिव्यस्य स्वरूपप्रामाण्ययोरागमगम्यत्वात् ।

* * * *

अतश्च यत्र परस्परविवादिनोर्युगपद्धर्माधिकरणं प्राप्तयोरेको मानुषीं क्रियामपरस्तु दैवीमवलम्बते तत्र मानुष्येव ग्राह्या ॥

End:

तत्र केचिन्नैविद्यवृद्धाः विवदमानराजद्वयमनुमान्य तत्सीमापरिज्ञातारं कुकूलधारणादिनिष्क्रमेन निनयेयुस्तत्र यदि तस्य भङ्गस्स तु हन्तव्य इति । तद्विषयश्चकारश्चानेकस्मृतिसिद्धस्समुच्चय किञ्चिदुच्यते ।

* * * *

राज्ञोस्सीमानिमित्ते विवदमानयोर्मध्यस्था आगत्य तत्सीमानिर्णयार्थं तत्परिज्ञातृपुरुषं यं कञ्चन समाहूय तमेकेन नयनेन साञ्जनमन्येन निरञ्जनमेकेन केशभागेन शिखावन्तमन्येन विस्रस्तकेशमेकेन पादेन सोपानत्कमन्येन निरुपानत्कं धृतकौपीनं बद्धमौनं कृत्वा आमकुकूलमध्ये जलं प्रक्षिप्य तन्मध्ये गणेशमर्चयित्वा तत्कूले दिक्पालाद्यावाहनं दिव्यमातृकोक्तं विधाय वरुणपूजां कृत्वा धरणिवराहमावाह्य वेदमन्त्रेण पूजयित्वा अपश्चाद्भागालोकं नयेयुः ।

* * * *

पश्चाद्भागं नालोकितवान्=अपश्चाद्भागालोकः ।

* * * *

आसेन्नेतादृशैः पदचङ्क्रमणैस्सीमां नयति सति कुकूलस्थजलदोषो वा कुकूलभङ्गो वा यदि स्यातां तं तदैवानुयायिनः प्रत्यर्थिनो हन्युः ॥

* * * *

अत्र साद्यस्किजयपराजयव्यवस्था नात्र त्रिपक्षप्रतीक्षणमिति ॥

No. 3172. धर्मरत्नम्—सव्याख्यानम्.

DHARMARATNAM WITH COMMENTARY.

Substance, paper. Size, $14\frac{1}{2} \times 9\frac{5}{8}$ inches. Pages, 204. Lines, 16 on a page. Character, Telugu (well written). Condition, good. Appearance, new.

Dāyābhāga complete The text, by Jīmūtavāhana, is from a well known treatise on the law of inheritance and partition, and forms the chief authority on the subject.

The commentary is by Śri-Kṛsnapārkālaṅkārabhaṭṭāchārya.

At the end there is an index extending over two pages and a list of errors corrected, covering two pages.

Beginning :

(मू.)

मन्वादिवाक्यान्यविमृश्य येषां यस्मिन् विवादो बहुधा बुधानाम् ।
तेषां प्रबोधाय स दायभागो निरूपणीयः सुधियः शृणुध्वम् ॥

अथ दायभागो निरूप्यते ।

तत्र नारदः—

विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥

पितृत आगतं पित्र्यम् । तच्च पितृमरणोपजातस्वत्वमुच्यते । पित्र्यस्येति पुत्रैरिति च द्वयमपि सम्बन्धिमात्रोपलक्षणम् । तेन सम्बन्धमात्रेण सम्बन्धिधनविभागेऽपि दायभागपदप्रयोगात् । अत एव दायभागं विवादपदमुपक्रम्य नारदोऽपि मात्रादिधनमप्युपदर्शितवान् ।

(व्या.)

पादाम्बुजे द्वे जगदम्बिकायाः श्रीकृष्णविप्रो हृदये निधाय ।
करोति टीकामिह दायभागग्रन्थावबोधाय सदेकरम्याम् ॥

ग्रन्थारम्भे विघ्नविघाताय देवतानामोच्चारणरूपं मङ्गलमाचरन् शिष्यप्रवृत्त्यर्थमभिधेयप्रयोजनसम्बन्धांश्च दर्शयन् दायभागमुद्दिशति—मन्वादीति ।

तथाचोक्तम्—

ज्ञाताधै ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
ग्रन्थादौ तेन वक्तव्यः सम्बन्धस्सप्रयोजनः ॥

अत्र अभिधेयो दायभागः, प्रयोजनं दायभागनिर्णयः ; स च संशयापनोदनद्वारा दुःखनिवृत्तिहेतुतया गौणः ।

End :

एवमादिका एकैकापि क्रिया परस्परं विभक्तानामेव संभवति ; तया विभागानुमानं धीमद्भिरनुसन्धेयमिति । एतच्छब्देन बह्वीनामुपादानात् मिलितानामेव गमकत्वं वाच्यम् ; न्यायमूलत्वात् वचनानाम् एकैकत्रापि च न्यायस्यावि शेषात् । न स्यातां पत्रसाक्षिणावित्यनेन पत्रसाक्षिणोरभावे अनुमानमनुसरणीयमित्युक्तम् ।

(मू.)

नाचार्यगौरवपराहतदायभागतत्त्वप्रबोधजनरञ्जनमत्र शक्यम् ।
किन्तु प्रमाणपरतन्त्रधियां मुनीनां संवादमात्रकृतये कृतिनः प्रयत्नः ॥

बहुविधपूर्वनिबन्धव्याख्यासञ्जातसंशयस्यैतत् ।
जीमूतवाहनकृतं प्रकरणमपनुत्तये ध्येयम्

Colophon :

इति पारिभद्रीयमहामहोपाध्यायश्रीजीमूतवाहनकृतौ धर्मरत्ने दायभागस्समाप्तम्(:) ॥

(व्या.)

तेषामेतत्प्रदर्शनार्थमेव प्रयत्न इत्यर्थः ।

सेतू भवाब्धेर्जगदेकहेतू ध्यात्वा हृदब्जे परदेवताङ्घ्री ।
धीमद्गुरुत्वे खलु दायभागे श्रीकृष्णविप्रो विवृतिं वितेने ॥
टिप्पणी विशदार्थेयं प्रभूतार्थप्रकाशिनी ।
धीरामोदकरी नाम्ना दायभागप्रबोधिनी ॥

Colophon :

इति श्रीकृष्णतर्कालङ्कारभट्टाचार्यकृता दायभागटीका समाप्ता ॥
सुरवर्त्मधराधरनागवलक्षगुसंमितविक्रमवर्षवरे ।
शुभश्रावणमासि सुपक्षदशीतिथियुक्ततरे बुधवासरके ॥
वरलाटनृपस्य मनोऽभिनुतं खलु दायविभागसुपुस्तवरम् ।
नवसूचिकया शुभया सहितं सततं परिपश्यतु तं सुजनः ॥
शाके शराग्निसप्तेन्दुसंमिते श्रावणीबुधे ।
संसो(शो)ध्य मैथिलात् पुस्ती बाबूरामेण लेखिता ॥

शाके १७३५ संवत् १८७० श्रावणशु १५ बुध.

No. 3173. धर्मरत्नम् —सव्याख्यानम्.

DHARMARATNAM WITH COMMENTARY.

Substance, paper. Size, 14¾ × 9½ inches. Pages, 204. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Dāyabhāga, complete.

Same work as the above.

No. 3174. धर्मरत्नम्—सव्याख्यानम्.

DHARMARATNAM WITH COMMENTARY.

Substance, paper. Size, $12\frac{1}{8} \times 8\frac{1}{4}$ inches. Pages, 204. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Dāyabhāga, complete.

The first leaf is wanting.

Same work as the above.

No. 3175. धर्मसेतुः.

DHARMASĒTUḤ.

Pages, 68. Lines, 5 on a page.

Begins on fol. 69*a* of the MS. described under No. 3165.

Complete.

A work on Dharma: treats of Vyavahāra: by Tirumala.

Beginning:

दक्षिणामूर्तिमानम्य तिर्मलेन द्विजन्मना ।
दायसम्बन्धबोधाय धर्मसेतुर्निबध्यते ॥

इह खलु पुरुषा अल्पधना बहुधनाश्च बहवस्सन्ति । तेषां सम्बन्धिनः पुत्रादयोऽपि बहवो विद्यन्ते । तथा स्थिते कस्य धनं केनाग्राह्यम्? कस्य पारलौकिकं कर्म केन कर्तव्यम्? सम्बन्धिनां च बहूना सत्त्वे कर्मकरणे दायग्रहणे च कस्य वाधिकारः? कस्य वानधिकारः? इति जिज्ञासमानानां धर्मतत्पराणां धर्ममर्यादाप्रदर्शनाय.

"तस्माच्छास्त्रं(स्त्रं) प्रमाणं ते कारा(र्या)कार्यव्यवस्थितौ."

इति धर्मसंस्थापनार्थमवतीर्णस्य भगवतो वासुदेवस्य वचनं प्रमाणमनुसन्धाय धर्मशास्त्राणि यथामति पर्यालोच्य महद्भिर्निबन्धनकारैर्व्यवस्थापुरस्सरमुदाहृतानि वचनानि प्रदर्शयता मया पारलौकिककर्मकरणे दायग्रहणे च पुरुषस्याधिकारस्सङ्क्षेपेण निरूप्यते ।

यद्यपि महानिबन्धनेषु प्राचीनैर्महद्भिर्विद्वद्भिर्धर्मशास्त्रवचनान्युदाहृत्य पिण्डदानाधिकारो दायग्रहणाधिकारश्च निरूपितः; तथापि तत्रत्यानां बहूनां वचनानामेकस्मिन् ग्रन्थे लिखितानां दर्शनतो भवत्येव गुणज्ञानां कश्चिदर्थविशेषनिश्चय इति मन्वानेन मया अनेकग्रन्थस्थितवचनसङ्ग्रहात्मकोऽयं धर्मसेतुर्नाम ग्रन्थो निबध्यते । तत्र महानिबन्धनकारैरुदाहृतानि प्रमाणानि सादरं शृण्वन्तु सन्तो मयि कृपावन्तस्सन्तः । यल्लाजीये—

अथाग्निप्रदातारः—

पुत्रः पौत्रश्च तज्जश्च पुत्रिकापुत्र एव च ।
पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा ॥
भगिनी भागिनेयश्च सपिण्डो धनहार्यपि ।
पूर्वपूर्वविनाशे स्यादुत्तरोत्तरपिण्डदः ॥

End:

विभक्तस्यापुत्रस्य धनं पत्नी गृह्णीयात्; पत्न्यभावे दुहिता गृह्णीयात्; दुहित्रभावे दौहित्रो गृह्णीयादिति स्मृतिहृदयाविदां सतां सैद्धान्तिकी पद्धतिः । एतद्विरुद्धार्थबोधकवचनानां विज्ञानेश्वरेणान्यथाव्यवस्थापनाद्विरोधशङ्काशङ्कूद्धरणं न पुनरस्माभिः करणीयमिति विस्तरभयाद्विरम्यते । विस्तरस्तु विज्ञानेश्वरीयादौ द्रष्टव्य इति सङ्क्षेपः ।

धर्मशास्त्रवचोरत्नैर्धर्मसेतुर्महोज्ज्वलैः ।
तिर्मलेन निबद्धोऽयं निर्मलैः परिपाल्यताम् ॥

Colophon:

इति श्रीदक्षिणामूर्तिप्रसादसमासादितसाहित्यविद्यासम्प्रदायस्य पराशरकुलकासारकैरवाङ्कुरस्य तिरुमलकवेस्सुकृतकेतुर्धर्मसेतुर्नाम ग्रन्थस्सम्पूर्णः ॥

रौद्रिवर्षे च वैशाखे शुक्लस्यैकादशी(शे)तिथौ ।
सोमवारे सतां प्रीत्यै दक्षिणामूर्तिकिङ्करः ॥
पराशरकुलोत्पन्नस्तिर्मलो वैदिको द्विजः ।
स्वनिबद्धं धर्मसेतुमलिखद्ग्रन्थमादरात् ॥
प्रीयतां दक्षिणामूर्तिरनेन करुणानिधिः ।
अहं तु दक्षिणामूर्तिपारतन्त्र्यनियन्त्रितः ॥
देवतासार्वभौमं तं विना नान्यो गुरुर्मम ।
सुकृतं दुष्कृतं वापि कुर्यां तस्यैव शासनात् ॥

No. 3176. पुत्रस्वीकारानिर्णयः.

PUTRASVĪKĀRANIRṆAYAḤ.

Substance, paper. Size, $8\frac{1}{8} \times 6\frac{1}{4}$ inches. Pages, 34. Lines, 18 on a page. Character, Grantha. Condition, good. Appearance, new.

A work by Rāmapaṇḍita on the adoption of sons.

The benedictory stanza is wanting.

Complete.

Beginning :

मानवालेयविज्ञानेश्वरचन्द्रिकाकालादर्शकालनिर्णयवरदराजीयादिस्मृतिकर्तृभिः उपस्मृतिकर्तृभिश्च विविच्य पुत्रस्वीकरणमारभ्याशौचान्तं यथावदनिरूपणाद्विदुषां सुखबोधनार्थमनेकस्मृतिपर्यालोच(न)वता शिष्टपरम्परानुष्ठानदर्शिना (श्रीरामनाम्ना)मया यथामति पुत्रविधिर्निरूप्यते । तत्र तावत् प्रजया हि मनुष्यः पूर्णः, त्रिभिर्ऋणवा[न्] जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी

* * * *

तत्रापि वासोदकतिलोदकं कतिसङ्ख्यया वा, धनग्रहणमपि ग्रहीतृकुलादेव वा, जनककुलादपि वा, [जनककुलादपि वा] पश्चादौरस उत्पन्ने विषमं समं वा, दत्तस्य स्वदाने दोषोऽस्ति वा न वा इत्याद्यनेकसंशये सति स्मृतिपर्यालोचनया अभियुक्तानुष्ठानेन च आधुनिकसङ्ग्रहस्मृतिपर्यालोचनया च न्यायोपबृंहितं यथाक्रमं यथामति निरूप्यते ।

End:

अस्यार्थः—

द्व्यामुष्यायणेनापि द्वाभ्यां पितृमातृभ्यां षट् पिण्डा एव देयाः, न तु द्वादश पिण्डाः; किन्तु तेष्वेव षट्सु द्वौ द्वावुपलक्षयेत्। तत्प्रकारश्च—

मार्जयन्तां मम पितर इत्यादि बहुवचनात् समानम् ।

यद्विपिता स्यादेकैकस्मिन् द्वौ द्वावुपलक्षयेदित्यापस्तम्बस्मरणा॥.

* * * *

एवं श्रीरामेण विदुषां सुखबोधनार्थं बहुस्मृतिभ्यस्सारमुद्धृत्य एकत्र निर्णीतम् ।

इदं निर्मत्सरतया सर्वैरप्यङ्गीकरणीयम् ॥

No 3177. पुत्रस्वीकारानिर्णयः.

PUTRASVĪKĀRANIRṆAYAḤ.

Pages, 39. Lines, 6 on a page.

Begins on fol. 49*a* of the MS. described under No. 3165.

Complete.

Same work as the above.

No 3178. पुत्रस्वीकारनिर्णयः.

PUTRASVĪKĀRANIRṆAYAḤ.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 32. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same work as the above.

Begins on fol. 1*a*. The other works herein are—

	Fol.		Fol.
Saptarsistōtram	17*a*	Pañcaratnastavaḥ . .	24*a*
Navaratnamālikā . .	19*a*	Śivāṣṭakam	24*b*
Subrahmaṇyāṣṭakam . .	21*a*	Rāghavāṣṭakam	25*b*
Śivapañcākṣarastōtram . .	21*a*	Kṛṣṇakarṇāmṛtam . .	27*a*
Sivapañcavaktrastava . .	21*b*	Daśaślōkī	59*a*
Nilakaṇṭhastōtram . .	22*a*	Langhanavidhānam . .	62*a*
Annapūrṇāstōtram . .	23*a*		

No. 3179. पुत्रस्वीकारनिर्णयः

PUTRASVĪKĀRANIRṆAYAḤ.

Pages, 24. Lines, 6 on a page

Begins on fol. 1*a* of the MS. described under No. 2790.

Wants beginning.

Incomplete.

Same work as the above.

Colophon:

नन्दनेन विदुषा श्रीरामनाम्ना श्रीवत्सान्वयप्रवणेन सकलकलाप्रवीणेन विरचितं पुत्रस्वीकारनिरूपणं समाप्तम् ॥

No. 3180. पुत्रस्वीकारनिर्णयः

PUTRASVĪKĀRANIRNAYAH.

Substance, palm-leaf (Śrītāla) Size, 16½ × 2½ inches Pages, 26. Lines, 8 on a page Character, Grantha Condition, good. Appearance, old.

Begins on fol. 1*a* The other work herein is. Saṁskārakaustubham 14*a*.

Complete.

Same work as the above

No 3181. पुत्रस्वीकारनिर्णयः.

PUTRASVĪKĀRANIRNAYAḤ.

Pages, 25. Lines, 9 on a page

Begins on fol 1*a* of the MS described under No 2066

Complete.

Same work as the above

No. 3182. पुत्रस्वीकारनिर्णयः.

PUTRASVĪKĀRANIRṆAYAḤ.

Substance, paper. Size, 12½ × 7½ inches. Pages, 24. Lines, 22 on a page Character, Grantha. Condition, good. Appearance, old.

Complete.

Beginning :—Same as in No. 3176.

End:

एतद्वां पितरौ विष्णुनारायणशर्माणौ, ये च युवामनु; एतद्वां पितामहौ माधवगोविन्दशर्माणौ, ये च युवामनु;

* * * *

तथा प्रकृतावेव द्वादशाहे आद्यसुत्यामित्यालेखन इति । तस्मादुपदेशमतानुसारिभिरवश्यमूहनीयम् ॥

Colophon :

इति श्रीवत्सकुलतिलकविश्वेश्वरसुतश्रीरामविरचितपुत्रस्वीकारनिर्णयस्समाप्तः ॥

No **3183.** पुत्रस्वीकारविधिः.

PUTRASVĪKĀRAVIDHIḤ.

Pages, 32. Lines, 6 on a page.

Begins on fol 82*a* of the MS. described under No. 2783.

Incomplete.

Same work as the above ; but begins with the benedictory stanza given below.

Beginning :

श्रीवत्सान्वयभूषणेन विदुषा श्रीरामनाम्ना सतां
प्रीत्यै वेदविदां वरेण महता सम्याग्विचार्यादरात् ।
मन्वादिस्मृतिभिर्यथामति कृता शास्त्रादिभिश्चान्यतः
पुत्रस्वीकृतिरातनोतु सुतरामामोदमिच्छावताम् ॥

No. **3184.** पुत्रस्वीकारविधिः.

PUTRASVĪKĀRAVIDHIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 23*a* of the MS. described under No. 2840.

The work of Bṛhacchaunaka on adoption.

Complete.

Beginning:

शौनकोऽहं प्रवक्ष्यामि पुत्रसङ्ग्रहमुत्तमम् ।
वन्ध्यो वा मृतपुत्रो वा पुत्रार्थी समुपोष्य च ॥

वाससी कुण्डले छत्रमुष्णीषं चाङ्गुलीयकम् ।
आदाय . . . . . वैष्णवं वेदपारगम् ॥

End:

दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥

Colophon:

इति बृहच्छौनकीये पुत्रसङ्ग्रहणविधिः ॥

No. 3185. पुत्रीकरणमीमांसा.

PUTRĪKARAṆAMĪMĀṀSĀ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 67. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Begins on fol. 1*a*. The other work herein is, Dakṣasmṛtiḥ 35*a*.

A treatise on the law of adoption by Nandapaṇḍita, son of Rāmapaṇḍita.

Beginning:

अभिवन्द्य जगद्वन्द्यपदद्वन्द्वं विनायकम् ।
पुत्रीकरणमीमांसां कुरुते नन्दपण्डितः ॥

केन कीदृक्कदा कस्मै कस्मात्तत्क्रियते सुतः ।
विविच्य नोक्तं यत्पूर्वैः तदशेषमिहोच्यते ॥

तत्राहात्रिः—

अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिस्सदा ।
पिण्डोदकक्रियाहेतोः यस्मात्तस्मात्प्रयत्नतः ॥ इति ।

End:

तस्मात् औरसेन क्षयाहे मातापित्रोः पार्वणमेव कार्यम् । इतरैः दत्तकादितरैः एकोद्दिष्टमेवेत्येव व्यवस्था साधीयसीत्यलं विस्तरेण । अथ दत्तकविभागः । तत्र वसिष्ठः—

तस्मिंश्चेत्प्रतिगृहीत औरस उत्पद्येत चतुर्थभागभागी स्यात् दत्तक इति । तदभावे तु सर्वहर इति ॥

Colophon:

इति श्रीधर्माधिकारिरामपण्डितात्मजश्रीनन्दपण्डितविरचिता दत्तमीमांसा समाप्ता ॥

इति नन्दपण्डितकृतपुत्रीकरणमीमांसा ॥

आर्जितं भूरिकष्टेन यत्नेन लिखितं मया ।
हर्तुमिच्छति यः पापी तस्य वंशक्षयो भवेत् ॥

No. 3186. पुत्रीकरणमीमांसा.

PUTRĪKARANAMĪMĀṂSĀ.

Substance, paper. Size 12⅞ × 8 inches. Pages, 52. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Same work as the above.

No 3187. पुत्रीकरणमीमांसा.

PUTRĪKARAṆAMĪMĀṀSĀ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 49*a* of the MSS. described under No. 1235

Incomplete.

Same work as the above.

No. 3188. विवादचिन्तामणिः.

VIVĀDACINTĀMAṆIḤ.

Substance, paper. Size, 10½ × 8½ inches. Pages, 154. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in Sīmāvivāda or disputes about boundary.

By Vācaspati.

Beginning:

क्षीराब्धेरुज्जिहानां त्रिदशपरिषदि प्रोल्लसद्भ्रूविभङ्गीम्
अङ्गीकुर्वन् कटाक्षैस्त्रिभुवनजननीं व्रीडया नम्रमौलिः ।
देवः पायादपायात्कुसुमशरपरीरम्भसञ्जातभावः
सद्यस्स्विद्यत्तरेण स्मितकमलमुखीमाददानः करेण ॥
श्रीकृत्यकल्पद्रुमपारिजातरत्नाकरादीनवलोक्य यत्नात् ।
वाचस्पतिः श्रीपतिनम्रमौलिः विवादचिन्तामणिमातनोति ॥

अथ विवादपदानि ।

तत्र मनुः—

तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः ।
सम्भूय च समुत्थानं दत्तस्यानव(प)कर्म च ॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयौ विवादः स्वामिपा(ल)योः ॥

End:

असम्भवन्यायमूलाया अप्यस्याः स्मृ(स्मृ)तेः वेदमूलत्वापत्तेश्च ।

नारदः—

संसृष्टानान्तु यो भागः तेषामेव स इष्यते ।
अतोऽन्यथांशभाजस्तु निर्जिजेषुरितरानियात्(?) ॥

तेषामेव संसृष्टानामेव । अतोऽन्य.

No. 3189. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, paper. Size, 17¼ × 11⅝ inches. Pages, 574. Lines, 15 on a page. Character, Dēvanāgarī Condition, good. Appearance, new

A work on Vivāda or questions of legal dispute by Jagannāthatarkapañcānana, son of Rudratarkavāgīśa. A note at the beginning runs thus :— "A digest of Hindu Law on contracts and successions, compiled by Jagannātha under the superintendence of Sir William Jones An English version by Mr. Colebrooke has been published."

The work is divided into five chapters called Dvīpas, and they are—(1) Ṛṇādāna, (2) Nikṣēpādi, (3) Bhṛtyādi, (4) Pārusyādi-(5) Dāyabhāga.

The sub-divisions of each Dvīpa are called Ratnas.— *Vide* page 465(*b*) of I. O. L. C.

This MS. contains the whole of the first Dvīpa or the chapter on Ṛṇādāna and 4 Ratnas in the second Dvīpa on Niksēpādi.

Beginning :

देवेशभूतेशगणेशविघ्नराजान् नमस्कृत्य गिरीन्द्रकन्याम् ।
गुरून्मुनीन् ग्रन्थकृतोऽतिमान्यान् भूपाज्ञया ग्रन्थमहं करोमि ॥

विवादभङ्गार्णवनामधेयं वैष(श)द्ययुक्तं बहुविस्तृतञ्च ।
सद्द्वीपरत्नं नृपधीरहृद्यं रौद्रिर्जगन्नाथ इति प्रसिद्धः ॥

क्व मे बुद्धिर्जीर्णनौका क्व शास्त्रं दुर्गमाम्बुधिः ।
प्रभ्वनुग्रह एवैतत् तरणे शरणं तथा ॥

राधाकान्तस्सविद्यो विमलदृढमतिश्श्रीगुरुस्सप्रसादः
श्रीरामो मोहनान्तो निधिरपि परगो रामतश्श्रीघनश्च ।
श्यामाम्भश्श्रीलगङ्गाधर इति विदितो यत्नवान् शिष्यवर्गः
कुर्यात्तत्कार्यसिद्धिं नृपबुधरमणीं निश्चयो मे विशङ्कः ॥

पोतयानशरणाः किल सिन्धुं निर्भया बहु तरंसि(रन्ति) सुदुर्गम् ।
दीर्घसद्गुणसहायसमेताः स्वानुकूलप(व)नेशनियुक्ता(:) ॥

धर्मशास्त्रेषु यत्प्रोक्तमृणादानादि सूरिभिः ।
व्याख्यातं च तथा पूर्वैर्ग्रन्थकृद्भिस्सुबुद्धिभिः ॥
आलोच्य तेषां वाक्यानि गूढार्थानि मनीषया ।
गुरूपदेशात्सर्वं तत् सुविचिन्त्य निरुच्यते ॥

अथ ऋणादानम् ।

तत्र नारद(:)—

ऋणं देयमदेयञ्च येन यत्र यथा भवेत् ।
दानग्रहणधर्माश्च ऋणादानमिति स्मृतम् ॥

येन उत्तमर्णीभूतेन वैश्यादिना ऋण(णं)देयं प्रयोज्यं यत्र अधमर्णे परिशेषात् ।

* * * *

देयता वृद्धिसद्भावे वृद्धिहानिश्च अत्यन्तविनाशे प्रतिनिधिदानं मूल्यदानं मूलविनाशो वेत्याह । इति ऋणादानादिविवादपदस्य विंशतिप्रकारस्य निर्वचनम् इति सङ्क्षेपः ॥

Colophon :

परिच्छेदातीताखिलविद्याधारापरिशीलनविमलीकृतपालधिकुलप्रसूतजाह्नवीसमलङ्कृतत्रिवेणीनिलयश्रीरुद्रतर्कवागीशभट्टाचार्यात्मजश्रीजगन्नाथतर्कपञ्चाननभट्टाचार्यविरचिते विवादभङ्गार्णवे ऋणादानद्वीपेऽत्याकर्षकमरकतरत्नं नवमम् ॥

समाप्तोऽयमृणादानद्वीपः प्रथमः ॥

अथ नि[:]क्षेपः ।

तत्र बृहस्पतिः—

ऋणादानप्रयोगादिदापनान्तं प्रकीर्तितम् ।
नि[:]क्षेपस्याधुना सम्यग्विधानं श्रूयतामिति ॥

प्रयोगः ऋणं देहीत्यनेन याचमानाय अधमर्णाय समर्पणम् । अर्थतः ऋणभिवतो धनस्य तदारभ्य दानपर्यन्तम् उद्ग्राहणपर्यन्तं समुदितमृणादानं विवादपदं प्रकीर्तितम् । एतेनावसरसङ्गतिस्सूचिता ।

End :

उत्तरोत्तरं न्यूनत्वे तु चौरसमान एव । षट्शतपणा इति किन्दण्डस्य न्यूनत्वाय अधिकत्वाय वा इत्यत्र विनिगमनाविरह इति वाच्यम् ; सम्बन्धिनां भोगार्हत्वेन न्यूनत्वस्यैव युक्तत्वादिति विभावनीयमिति दिक् । अस्वामिविक्रयः साङ्गोपाङ्गम् ॥

Colophon :

परिच्छेदानीताखिलविद्याधारापरिशीलनविमलीकृतपालधिकुलप्रसूतजाह्नवीसमलङ्कृतत्रिवेणीनिलयश्रीरुद्रतर्कवागीशात्मजश्रीजगन्नाथतर्कपञ्चाननभट्टाचार्यकृते विवादभङ्गार्णवे नि[:]क्षेपादिद्वीपे द्वितीये अतिशोभान्वितेन्द्रनीलरत्नं चतुर्थम् ॥

No. 3190. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, paper. Size, 17¼ × 10¾ inches. Pages, 806. Lines, 15 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains the following :—

Ṛṇādāna—Breaking off in the 6th Ratna.

Nikṣēpādi—Complete, excepting the beginning of the 9th Ratna.

Bhṛtyādi—Ratnas 1 to 7.
Pāruṣyādi—Strīpumdharma, complete.
Nikṣēpādi—Ratnas 5 to 8 and the beginning of the 9th.

No. 3191. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, paper. Size, $17\frac{3}{4} \times 11\frac{1}{2}$ inches. Pages, 370. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains 5 to 9 Ratnas in Nikṣēpādidvīpa, and Ratnas 1 to 3 in the third Dvīpa on Bhṛti, *i.e.*, on wages.

Beginning:

अथ सम्भूयसमुत्थानम् ।

तदाह नारदः—

वणिक्प्रभृतयो यत्र कर्म सम्भूय कुर्वते ।
तत्सम्भूयसमुत्थानं व्यवहारपदं स्मृतम् ॥

सम्भूय धनमेलकं कृत्वेति रत्नाकरः । सम्भूय मिलित्वा संशब्द-योगेन भूधातोर्मिलनबोधनात् । तच्च मिलनं धनद्वारा शरीरचेष्टाद्वारा वा यथा पञ्च वणिजः स्वस्वधनानि एकत्र कृत्वा द्रव्यक्रयादिना वाणिज्यं कुर्वन्ति ।

End:

मिश्रस्तु—

पूर्णकालेऽर्पितश्चेन्न स्यात् । तदा राजराजदैविकमन्तरेण काल-दोषादिनापि नष्टं ग्रहीतुः समाधेयं भवेत् इत्यर्थ इत्याह । एत-न्मते राजदैवोपघातमन्तरेण गृ(ग्र)हीतृदोषात् नष्टं ग्रहीत्रा देयमिति तु निक्षेपाति[illegible]पोक्तवचनादेवावसेयमिति वेतनादानपरिच्छेदः ॥

पां छेदातीतेत्यादितृतीये भृत्यादिद्वीपे अतिशोभान्वितेन्द्रनीलरत्नं तृतीयम्

No. 3192. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, paper. Size, 16⅝ × 10½ inches. Pages, 208. Lines. 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Ṛṇādāna, complete.

No. 3193. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, paper. Size, 12¾ × 8 inches. Pages, 274. Lines, 23 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Ṛṇādāna, complete.

No. 3194. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, paper. Size, 13 × 8 inches. Pages, 516. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains Nikṣēpādi, Bhṛtyādi (Ratnas 1 to 7), and Pārusyādi (Strīpumdharma).

No. 3195. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, paper. Size, 13¼ × 8⅜ inches. Pages, 232. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

Ṛṇādāna, Ratnas 1 (wants 13 leaves in the beginning) to 8, and the 9th incomplete.

No. 3196. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, paper. Size, 16½ × 10¾ inches. Pages, 322. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the whole of Ṛṇādāna-dvīpa and of Nikṣēpa-dvīpa only Ratnas 8 and 9.

No. 3197. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, paper. Size, 17⅛ × 10⅞ inches. Pages, 454. Lines, 28 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains Dāyabhāga, the 5th Dvīpa, from about the 3rd Ratna to the end; Nikṣēpādi, complete; and Ṛṇādāna from about the 7th Ratna to the end.

No. 3198. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, palm-leaf. Size, 17⅝ × 1¼ inches. Pages, 294. Lines on a page. Character, Grantha. Condition, injured. Appearance, new.

Dāyabhāga the 5th Dvīpa Ratnas 1 to 4.

No. 3199. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance. paper. Size, 16½ × 10⅝ inches. Pages, 240. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Nikṣēpādi-dvīpa, Ratnas 1 to 7 complete; Pāruṣyādi-dvīpa, the 4th Dvīpa, Strīpumdharma complete; and Bhṛtyādi-dvīpa, Ratnas 1 to 7 complete.

No. 3200. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 63 Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Ādhiprakaraṇa and Pratibhūprakaraṇa, complete; Vṛddhiprakaraṇa, incomplete

---

No. 3201. विवादभङ्गार्णवः.

VIVĀDABHAṄGĀRṆAVAḤ.

Substance, paper Size, $16\frac{1}{2} \times 10\frac{1}{2}$ inches. Pages, 318. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, old.

Dāyabhāga complete.

Beginning:

तत्र नारदः—

विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥

यत्र यस्मिन् व्यवहारपदे । प्रकल्प्यते क्रियत इति रत्नाकरः । पितृत आगतं पित्र्यम्; तच्च पितृमरणोपजातस्वत्वमुच्यते ।

End:

अथ स्वसङ्क्रान्तं मातृस्त्रीधनं दुहिता स्वेच्छया यस्मै कस्मै चित् दद्यात् । तदुपरमेऽपि दुहितृजामात्रादिरपि प्राप्नुयात् । न च पुंधनवत् स्त्रीधनेऽपि दुहितुर्यावज्जीवं भोग एवानुमत इति वाच्यम्; जीमूतवाहेनानालिज(वेद)नात्, युक्त्यभावाच्चेत्यवधेयम् ॥

Colophon:

परिच्छेदातीताखिलविद्याधारापरिशीलनविमलीकृतपालधिकुलप्रसूतजाह्नवीसमलङ्कृतत्रिवेणीनिलयश्रीरुद्रतर्कवागीशभट्टाचार्यात्मजश्रीजगन्नाथपञ्चाननकृते विवादभङ्गार्णवे पञ्चमे दायभागद्वीपे अतिशोभान्विते इन्द्रनीलरत्नं नवमम् ॥

No. 3202. विवादरत्नाकरः.
VIVĀDARATNĀKARAḤ.

Substance, paper. Size, 12 × 9½ inches. Pages, 232. Lines, 24 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, new.

A work on Hindu law by Ṭhakkura Caṇḍēśvara. son of Vīrēśvara.

Beginning:

कुसुमशरविलासे भङ्गुरस्याद्रिपुत्री-
करतलवलयस्य क्ष्मागतस्यार्धमेकम् ।
निजमिव शशिखण्डं मन्यमानस्य शम्भोः
भवतु सह विवादः कान्तया कौतुकाय ॥
जटायां बद्धायां मदनजयिना विश्वपतिना
विवादं जातं तद्धनविभजने तत्तनययोः ।
परिच्छिन्दन् ब्रह्मा गणपतिविशाखौ नियमयन्
मुदे दायादायव्यवहृतिविपाश्चिद्भवतु वः ॥
श्रीचण्डेश्वरमन्त्रिणा मतिमतानेन प्रसन्नात्मना
नेपालाखिलभूमिपालजयिना धर्मेन्दुदुग्धाब्धिना ।
वाग्वत्यास्सरितस्तटे सुरधुनीसाम्यं दधत्याश्शुचौ
मार्गे मासि यथोक्तपुण्यसमये दत्तस्तुलापूरुषः ॥
यो गम्भीरविवादवारिधिजले निर्मज्जतामुद्धृतिं
कुर्वन् पोत इवोल्लसद्गुणगुरुः कीर्तिं परामश्नुते ।

मीमांसानयनो विचारचतुरो मन्त्रीन्द्रचण्डेश्वरः
सः श्रीमान् परमत्र वादविषयं प्रस्तौति रत्नाकरम् ॥

श्रीमन्निप(न्विवाद)पददुर्गतिपातकानाम्
उद्धारहेतुकृतनिर्णयलब्धपुण्यः ।
चण्डेश्वरस्सचिवरत्नमिमं विवाद-
रत्नाकरं रचयति श्रुतिशास्त्रविज्ञः ॥

ऋणादानं ततो वृद्धिरकृता वृद्धिरप्यथ ।
वृद्धिश्च परमा वृद्धिनिषेधस्तदनन्तरम् ॥
अथाधिविधिसिद्धिश्च ततोऽपि प्रतिभूविधिः ॥
ऋणादानमिति प्रोक्तम् उद्ग्राहणविधिस्ततः ॥

* * * *

शतमेकं तरङ्गाणां विदुषां चित्तरञ्जनम् ।
विधीयन्ते विधिज्ञेन श्रीचण्डेश्वरमन्त्रिणा ॥

अथ ऋणादानविवादपदम् ।

तत्र बृहस्पतिः—

पदाङ्गसहितस्सम्यक् विवादस्त्वेष कीर्तितः ।
विवादकारणान्यत्र पदानि शृणुताधुना ॥

End :

तथा—

चातुर्वर्ण(र्ण्य)स्य या स्तु(जा)तिः असजात्यादि(ति) समुद्भवा ।
तस्य धर्मास्समुद्दिष्टा जातिस्सा परिकीर्तिता ॥

असजातिसवर्णः ।

कल्पद्रुमे वाप्यथ पारिजा(जो) हलायुधे वाप्यथ वा प्रकाशे ।
यत्सारमस्या(स्मा)दधिकं च यत्तत् दधाति रत्नाकर एव पारम् ॥

यं कामधेनुरसजा(नुया)ति सकल्पवृक्षा
यं सेवते निजफलाय स पारिजातः ।
तं वैरिगोत्रदनुबृन्दसहस्रदृष्टिं
चण्डेश्वरं तुलयितुं कतमे भवन्तु ॥

श्रीकृत्यदानव्यवहारशुद्धिपूजाविवादेषु तथा गृहस्थे ।
रत्नाकरा धर्मभुवो निबन्धाः कृतास्तुलापूरुषदेन सप्त ॥

रसगुणभुजचन्द्रैः संमिते शाकवर्षे
सहसि धवळपक्षे वाग्वतीसिन्धुतीरे ।
अदित तुलितमुच्चैरात्मना स्वर्णराशिं
निधिराखिलगुणानामुत्तरं सोमनाथः ॥

Colophon :

इति सप्रक्रियमहासान्धिविग्रहिकठक्कुरश्रीवीरेश्वरात्मजसप्रक्रियमहासान्धिविग्रहिकठक्कुरश्रीचण्डेश्वरविरचितो विवादरत्नाकरः सम्पूर्णः ॥

No. 3203. विवादसारार्णवः.

VIVĀDASĀRĀRṆAVAḤ.

Substance, on a p: Size, 17 × 11 inches. Pages, 264. Lines, 24 Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete in 9 Taraṅgas.

Two pages at the end contain a list of the contents of all the nine Taraṅgas.

This is a digest of Hindu Civil Law said to have been compiled by Trivēdī Sarvōruśarmā at the instance of Sir William Jones, in 1789.

Vide I.O.L Catalogue, page 457(*b*).

Beginning:

श्रीकालिका मञ्जुकपालमालिका सृष्टिस्थितिध्वंसकटाक्षचालिका ।
आस्तां सदा सेवकवर्गपालिका सच्चिन्मयी विघ्नसमूहदालिका ॥

इङ्ग्लीष्सुदेशार्णवभूसुधाकरो दिशो यशश्चान्द्रिकया प्रकाशयन् ।
अधीत्य शास्त्रं प्रतिभाषयाथ तत्स्वया समस्तं स्वलिपौ युयोज यः ॥

यस्यास्त्ययोध्या नगरीन्द्रकोटिभिः विपक्षपक्षेऽनुचरा(रो) विभाषि(भीष)णः ।
सुग्रीवनीलाङ्गदवीरशोभिता सदाभिरामस्य चमूः खलद्विषः ॥

चिन्तामणेः प्रस्तरतां सुरद्रोः काष्ठचां(ष्ठीं) पशुत्वं किल कामधेनोः ।
करोति यो व्यक्तमयाच्यमानो दातार्थिने ह्यर्थितदायिनस्ते ॥

शुभ्राद्वैतसमादिष्टे लोके यद्यशसा लिपेः ।
साधनत्वमगान्नूनं परास्तार्यशोमसी(षी) ॥

अर्थं यथाशास्त्रमवेत्य शासितुं प्रजास्सुधीर्मेस्तरजोन्सभूपतिः ।
अजिज्ञपत्स व्यवहारसाधको ग्रन्थस्समस्तार्थमयो विरच्यताम् ॥

अध्येयि(षि)तस्तेन तदा प्रवृत्तिग्रन्थान् समालोड्य बहून् त्रिवेदी ।
सर्वोरुशर्मा विषयानुरूपं विवादसारार्णवमातनोति ॥

अथ प्रजापालनाधिकृतेन प्रजापरिपालनाय व्यवहारदर्शनं प्रत्यहं कर्तव्यम् ।

इति सञ्चिन्त्य नृपतिः क्रतुतुल्यफलं पृथक् ।
व्यवहारान् स्वयं पश्येत् सभ्यैः परिवृतोऽन्वहम् ॥

इति याज्ञवल्क्योक्तेः ।

धर्मशास्त्रान् पुरस्कृत्य प्राड्विवाकमते स्थितः ।
समाहितमतिः पश्येत् व्यवहाराननुक्रमात् ॥

इति नारदोक्तेश्च ।

End:

युज्यते । निषेधाभावस्यैव तत्र विभागप्रमापकत्वादिति सकलेष्ट-सिद्धिः ।

अथानुक्रमणीं वक्ष्ये सुधियां सुखबुद्धये ।
मङ्गळाचरणञ्चाथ प्रजापालनचिन्तनम् ॥

परिमाणव्यवस्था च व्यवहारपदं तथा ।
वृद्धिव्यवस्थानिषेधावाधिप्रतिभुवोः क्रिया ॥

ऋण(ा)दानतदुद्ग्राहावेतान्याद्ये तरङ्गके ।
निक्षेपक्रीतानुशयौ विक्रि(क्री)यासम्प्रदानकम् ॥

अस्वामिविक्रयो नष्टलब्धनिध्यादिचिन्तनम् ।
दासभाटकयोरुक्तिः सम्भूय च समुत्थितिः ॥

दत्ताप्रदानिकश्चाथ संविदश्च व्यतिक्रमः ।
स्त्रीपुंयोगः स्वामिपालविवादः सस्यरक्षणम् ॥

निरूपितानि चैतानि तार्तीयीके तरङ्गके ।
दायभागो निरंशोक्तिः अविभाज्यप्रकीर्तनम् ॥

स्त्रीधनप्रक्रिया चाथ विभागः स्त्रीधनस्य च ।
विवाहभेदकथनं गुप्तभागनिरूपणम् ॥

वर्णानां समवाये च विभागस्य व्यवस्थितिः ।
पुत्राणां लक्षणञ्चाथ पुत्रहीनार्थभागिनः ॥

संसृष्टिधन[वि]भागोक्तिर्विभागस्यापि निर्णयः ।
तुर्ये तरङ्ग एतानि कथितानि समासतः ॥

क्रियाबलाबलञ्चाथ दानपत्रव्यवस्थितिः ।
आज्ञापत्रविचारश्च जयपत्रविधिस्तथा ॥

मातृका व्यवहाराणां कथिता तदनन्तरम् ।
प्रमाणानां व्यवस्थोक्ता ततो दिव्यविचारणा ॥

सीमाविवादकथनमथ सेतुव्यवस्थितिः ।
कृष्टाकृष्टोक्तिरेतानि तरङ्गे पञ्चमे ततः ॥

व्यवस्था लिखितस्याथ भुक्तिसाक्षिनिरूपणे ।
असाक्षिकथनं साक्षिप्रश्नश्चैतानि षष्ठके ॥

तरङ्गेऽनन्तरं द्यूतसमाह्वयनिरूपणम् ।
वाक्पारुष्यं तथा दण्डपारुष्यं स्तेयनिर्णयम्(:) ॥

अप्रकाशचौरदमः तथा स्तेननिदेशनम् ।
चौरापवाद एतानि तरङ्गे सप्तमे तथा ॥

साहसं(च) स्त्रीग्रहणं तद्दण्डश्चापि कीर्तितः ।
कन्यादूषणदण्डश्च एतान्यष्टमतामिते ॥

तरङ्गे कथितान्यग्रे प्रकीर्णकविचारणा ।
तरङ्गे नवमे प्रोक्ता इति ग्रन्थस्समाप्यते ॥

सर्विल्यंज्योन्सनामा नृपतिरतिगुणग्रामधामारिवामा-
कामारामाभिरामावसतिराति(गति)स्थानमेकं नृपाणाम् ।
लोकान्यायादपायाद्गलदवधिविधिख्यातिकर्पूरपूरैः
पूरंपूरं सुदूरं महिविबुधबुधाशीर्भिरापूर्णकामः ॥

श्रीमद्यज्ञपतेरबाधितगतेः शास्त्राकरे सन्मतेः
स्फूर्जत्युन्यतने(त्पुण्यततेः) शिवापदरते(:)धीरेश्वरोऽभूत्सुतः ।
गुण्यो मान्यमनीषिणां सुकृतिनां धन्योऽग्रगण्यस्ततो
जातो ग्रन्थममुं विवादविषयं सर्वोरुशर्माकृतम् (करोत्) ॥

बाणवेदवसुयुग्वैक्रमाब्दे व्यरच्यसौ ।
कल्कत्तानगरे ग्रन्थोऽनेन तुष्यतु कालिका ॥

Colophon:

इति राजसमाजविराजमानमानोन्नतमहाप्रतापसर्विल्यंमिस्तर(र्)श्रीजोन्समहीपाज्ञप्तिवेदिसर्वोरुशर्माविरचिते विवादसारार्णवे नवमस्तरङ्गः ॥

ग्रन्थश्चायं समाप्तः ॥

No. 3204. विवादार्णवसेतुः.

VIVĀDĀRṆAVASĒTUḤ.

Substance, paper. Size, 16¼ × 10⅜ inches. Pages, 298. Lines, 23 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in 21 Taraṅgas.

A digest of Hindu Law said to have been compiled for Warren Hastings by Pandits Bāṇēśvara, Kṛpārāma, Rāmagōpāla, Kṛṣṇajīvana, Vīrēśvara, Kṛṣnacandra, Gaurīkānta, Kālīśaṅkara. Śyāmasundara, Kṛṣṇa, Kēśava, and Sītārāma. *Vide* also I. O. L. Catalogue, page 458(*a*).

Beginning:

विश्वेषां शरणं नवाम्बुदरुचिः सद्भक्तचिन्तामणिः
यः प्रत्यूहतमोविनाशमिहिरः कीनाशभीनाशनः ।
संसारैकमहार्णवे निपततां निस्तारबीजं नृणां
गोविन्दः कृपया सुरासुरगणैर्वन्द्यश्चिरं पातु नः ॥

चण्डेशधारेश्वरविश्वरूपा मिताक्षराकारहलायुधौ च ।
श्रीकृष्णवाचस्पतिधर्मरत्नकृतस्तथा श्रीकरशूलपाणी ॥
गोविन्दलक्ष्मीधरतत्त्वकारा आचार्यचूडामणिनाचभट्टः ।
वाक्यानि चैषां सुविमृश्य कुर्मो ग्रन्थं विवादार्णवभञ्जनाख्यम्

इह वाच्यानि वर्णादेः सृष्टिस्तद्धर्मनिर्णयः ।
राजप्रशंसा तच्छत्रमात्रिदूतादिलक्षणम् ॥

राजधर्म ऋणादानं वृद्ध्यादिविधेलक्षकाः ।
ऋण(ा)दानोद्ग्राहणयोर्विधिर्दायनिरूपणम् ॥

* * *

स्त्रीपुन्धर्मनिर्णयश्च प्रकीर्णकमतः परम् ।
बहुधा विधयस्तत्र निधिदण्डाश्रिताः पुनः ॥

अथ सृष्टिः ।

तत्र महाभारतम्—

महाभूतानि भूतात्मा महात्मा पुरुषोत्तमः ।
वायुर्ज्योतिस्तथा चापः खञ्च गाञ्चान्वकल्पयत् ॥

End:

स्तेनास्सुरापा ब्रह्मघ्ना गुरुदाराभिगामिनः ।
न सन्ति यस्य राष्ट्रेषु स राजा शक्रलोकभाक् ॥

मनुः—

अनेन विधिना राजा मिथ्याविवदतां नृणाम् ।
साक्षिप्रत्ययसिद्धानि कार्याणि समतां नयेत् ॥

उदितो विस्तरेणायं मिथ्याविवदमानयोः ।
अष्टादशसु मार्गेषु व्यवहारविनिर्णयः ॥

एवं कार्याणि सर्वाणि सर्वान् सम्यङ्महीपतिः ।
देशादलब्धाल्लिप्सेत लब्धांश्च परिपालयेत् ॥

Colophon:

इति विद्वद्विरचिते विवादार्णवसेतुके ।
तरङ्गो निधिदण्डाद्यैरेकविंशोऽत्र कीर्तितः ॥

बाणेश्वरकृपारामरामगोपालकृष्णजीवनाख्यैः, वीरेश्वरकृष्णचन्द्रश्रीगौरीकान्ताभिधानैः, सद्भिः कालीशङ्करश्यामसुन्दरकृष्णकेशवसंज्ञैः, सीतारामसंज्ञैश्च कृतो ग्रन्थः स्फुरतु सभायाम् ॥

इत्यनेकविषयवासिविद्वद्वृन्दोपवर्णितः ।
विवादार्णवसेत्वाख्यो ग्रन्थस्सम्पूर्णतां गतः ॥

No. 3205. विवादार्णवसेतुः.

VIVĀDĀRṆAVASĒTUḤ.

Substance, paper. Size, 16½ × 10⅞ inches. Pages, 336. Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

Same work as the above.

No. 3206. वीरमित्रोदयः.

VĪRAMITRŌDAYAḤ.

Substance, paper. Size, 13⅛ × 8¼ inches. Pages, 262. Lines, 22 on a page. Character Telugu. Condition, good. Appearance, new.

I Paricchēda or Vyavahāra, incomplete Breaks off in Divyapramāṇa.

A work relating to Dharmaśāstra by Mitramiśra, son of Paraśurāma and grandson of Haṁsapaṇḍita.

Beginning :

अथ वीरमित्रोदयाख्यधर्मशास्त्रं लिख्यते ।

तत्र प्रथमं व्यवहाराख्यप्रकरणम्—

पुरतः प्रविलोक्य भर्गचापं परतः कामपि कामकार्मुकज्याम् ।
पुलकाञ्चितपीनबाहुदण्डः कुशलं नः कुरुताद्रघुप्रकाण्डः ॥ १ ॥

स्वस्तिश्रीयुतवीरसिंहनृपतेराज्ञावशादुत्सुकः
श्रीमित्राभिधपण्डितः प्रतिदिशं कीर्त्यानिशं मण्डितः ।
नानानिर्णयवर्णनं व्यसनिनां सङ्ख्यावतां प्रीतिदं
सम्प्राप्तव्यवहारसाधकमिमं कुर्वे प्रकाशं परम् ॥ २ ॥

उद्वृत्तप्रभवप्रजापरिभवप्राग्भारभङ्गा(ङ्गो)द्भृता-
नन्ताकारमरागमत्सरबुधाराध्यं निदिध्यासनैः ।
धर्मैकाश्रयमाश्रयं मुनिगिरामद्धा सदुद्धारकं
प्रस्तौमि व्यवहारमच्युतमिव प्राक्प्रस्तुतं प्राक्तनैः ॥ ३ ॥

परिभाषापरिष्कारः प्रमाणानां निरूपणम् ।
विवादपदनिर्देशः प्रकीर्णकविवेचनम् ॥ ४ ॥

एवं प्रकरणान्यत्र चत्वारि प्रथमे पुनः ।
लक्षणं व्यवहारस्य निरुक्तिर्मुनिभाषिता ॥ ५ ॥

* * * *

एतेऽर्थास्सम्यगुच्यन्ते तुरीये तु प्रकीर्णकम् ।
यन्नोक्तमुपयुक्तं तद्विविच्य प्रतिपाद्यते ॥ २१ ॥

अथ कोऽयं व्यवहारः ? प्रमाणतर्कोपष्टब्धः पक्षप्रतिपक्षपरिग्रह इति चेन्न । वादादेरपि तत्त्वापत्तेः । लिखितादिः प्रमाणविशेषः परिगृह्यत इति चेत् तत्रापि तत्प्रवृत्त्यविरोधात् अनुमानाद्यबहिर्भावाच्च तेषामव्यावर्तकत्वात् ॥

* * * *

उच्यते ।

ऋणादानादिर्लौकिकार्थविषया कथैव व्यवहारः । कथाव्यपदेशाभावस्तु शास्त्रीयपदार्थाविषयत्वात् ।

* * * *

Colophon:

इति श्रीमत्सकलसामन्तचक्रचूडामणिमञ्जरीधीमञ्जरीनीराजितचरणकमलश्रीमन्महाराजाधिराजप्रतापरुद्रतनूजमधुकरस्वादसूनुश्रीमन्महाराजाधिराजचतुरुदधिजलवलयवसुन्धराहृदयपुण्डरीकविकासदिनकरश्रीवीरसिंहदेवोद्योगितश्रीहंसपण्डितात्मजश्रीपरशुरामसूनुसकलविद्यापारावारपारीणधुरीणजगद्दारिद्र्यमहागजपारीन्द्रविद्वज्जनजीवातुश्रीमान्मित्रमिश्रकृते श्रीवीरमित्रोदयाभिधनिबन्धे व्यवहारप्रकाशे परिभाषापरिष्कारारव्यं व्यवहारमातृकापरपर्यायं प्रथमप्रकरणम् ।

End:

इति दिव्यमातृका ॥

अथ धटविधिः—

तत्र पितामहः—

विशालमुच्छ्रितां शुभ्रां धटशालां(तु) कारयेत् ॥
यत्रस्था(स्थो) नोपहन्येत श्वभिश्चण्डालवायसैः ॥
कपाटबीजसंयुक्तां परिचारकरक्षिताम् ।
पानीयादिसमायुक्तामशून्यां कारयेन्नृपः ॥ इति ।

* * * *

प्राङ्मुखो निश्चलः कार्यश्शुचौ देशे धटस्सदा ।
इन्द्रस्थाने वा ध.

No. 3207. व्यवहारकाण्डः.

VYAVAHĀRAKĀṆḌAḤ.

Substance, palm-leaf (Śrītāla). Size, $15\frac{7}{8} \times 2\frac{1}{2}$ inches. Pages, 72. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A work on Hindu law by Akhaṇḍādarśa.

Beginning:

धर्मकाण्डः चिन्तितः पूर्वमखण्डेन । अथात्र खण्डेन व्यवहार' क्रियते ।

तत्र बृहस्पतिः—

दुर्गमध्ये गृहं कुर्यात् जलवृक्षान्वितं पृथु ।
प्राग्दिशिं प्राङ्मुखीं तत्र कल्याणीं कल्पयेत्सभाम् ॥
माल्यधूपसरोपेतां बीजरत्नविभूषिताम् ।
प्रतिमालेख्यदेवैश्च युक्तामग्न्यम्बुना तथा ॥

* * * *

प्रकृतो विद्वान् प्राड्विवाकः । बृहस्पति'—

वेदवेदान्ततत्त्वज्ञास्सप्त पञ्च त्रयोऽपि वा ।
यत्रोपविष्टा विप्रास्स्युः सा यज्ञसदृशी सभा ॥

End:

पाषण्डादिसमयधर्मनैगमश्रेणीगणधर्मस्थापनो राजा विपरीतकृत्ये निषेधयेत् । सर्वत्र द्विजातिपरिपालनं परमो धर्मः ।

यमा(मः)—

एवन्धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।
यशोऽस्मिन् पृथिवी(प्रथते)लोके स्वर्गे वासस्तथाक्षयः ॥

Colophon:

इत्यखण्डादर्शीये व्यवहारकाण्डस्समाप्तः ॥

राजा लब्धाधि(ब्धं निधिं)दद्याद्द्विजेभ्योऽर्धं द्विजः पुनः ।
विद्वानशेषमादद्यात् (स) सर्वस्य प्रभुर्यतः ॥
इतरेण निधौ लब्धा(ब्धे) राजा षष्ठांशमाप्नुयात् ।
अनिवेदितविज्ञाते दाप्यस्तद्दण्डमेव च ॥

वसिष्ठः—

वानप्रस्थधनमाचार्याभावे विप्रो वा राजा वा । याज्ञवल्क्यः ।

No. 3208. व्यवहारकाण्डः.

VYAVAHĀRAKĀṆḌAḤ.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{3}{4}$ inches. Pages, 122. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is, Vyavahāraviṣaya 62*a*.

Incomplete. The first leaf is wanting.

Beginning:

(धर्मशास्त्रा)भिज्ञैर्ब्राह्मणैर्न क्षत्रियादिभिरपि । ब्राह्मणैस्सहेति तृतीयानिर्देशान्नै(च्चै)षामप्राधान्यम् ; सहयुक्तेऽप्रधान इति स्मरणात् । अतश्चादर्शने राज्ञो दोषो न ब्राह्मणानाम् । यथाह मनुः—

अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव गच्छति ॥ इति ।

End:

नन्विदं वचनं द्वैगुण्यमात्रं प्रतिपादयति ; तच्च पूर्वोक्तकालक्रमाबाधेनाप्युपपद्यते ; यथा जातेष्टिविधानं शुचित्वाबाधेन ।

अपि च—

सद्यस्सवृद्धिकदानपक्षे पशुस्त्रीणां सद्यस्सम्पत्त्यभावान्नो.

No. 3209. व्यवहारकाण्डः.

VYAVAHĀRAKĀṆḌAḤ.

Substance, paper. Size, $13\frac{3}{8} \times 18\frac{1}{8}$ inches. Pages, [illegible]. Lines, [illegible] on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Breaks off in Vākpāruṣya.

Begins on fol. 42*a*. The other works herein are—Rājalakṣmīhṛdaya 1*a*, Rājalaksmīnārāyaṇahṛdaya 28*a*, Paṭṭābhiṣēkavidhiḥ 34*a*.

Breaks off in Vākpāruṣya

व्यवहारकाण्डो निरूप्यते ।

स्मृतिकर्ता(र)स्तु—

Beginning:

मन्वङ्गिरोव्यासगौतमात्रेययमवसिष्ठदक्षसंवर्तशातातपपराशरविष्ण्वाप-स्तम्बहरितशङ्खकात्यायन.

* * * *

इतिहासादयः—

सत्यतव(प)उपाख्यानसोमोत्पत्तिप्रभ्य(भृ)तयः ।

मन्वादिसकलस्मृतिषु प्रथममाचारकाण्डः, तदनन्तरं व्यवहारकाण्डः, तदनन्तरं प्रायश्चित्तकाण्ड इति तत्तदाचारकाण्डानन्तरं व्यवहारकाण्डा-(ण्ड)मादौ निरूप्यते । तत्र व्यवहारदर्शने राज्ञामेवाधिकारः । वर्णा-श्रमादीनां राजैकनियतधर्मत्वात् । तथा च याज्ञवल्क्यः—

इदन्द्या(सुदण्ड्या)न् दण्डयेद्राजा सम्यग्वध्यांश्च घातयेत् ।
इ(य)ष्टव्यात्(:)क्रतुभिस्तेन समाप्तवरदक्षिणैः ॥
दण्डो धनदण्डश्शारीरश्च; अकरणे प्रत्यवायस्मरणात् ।

End:

शोणितेन विना दुःखं कुर्वन् काष्ठादिभिर्नरः ।
द्वाविंशतिपणं दद्यात् द्विगुणं दर्शनेऽसृजः ॥ इति ।
करवद्दण्डभङ्गे च छेदने कर्णनासयोः ।
मध्यो दण्ड(:)प्रणोच्छेदे मृते कल्पपदे तदा ॥

No. 3210. व्यवहारकाण्डः.

VYAVAHĀRAKĀṆḌAḤ.

Substance, paper. Size, 13½ × 10⅝ inches. Pages, 102. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Incomplete.

Beginning:

इदानीं व्यवहारकाण्ड आरभ्यते । तत्र आदौ व्यवहारस्वरूपं निरूप्यते ।

तत्र बृहस्पतिः—

धर्मप्रधानाः पुरुषाः पूर्वमासन्नहिंसकाः ।
लोभद्वेषाभिभूतानां व्यवहारः प्रकीर्तितः ॥ इति ।

अस्यार्थः नारदेन विवृतः—

धर्मैकतानाः पुरुषा यदासन्सत्यवादिनः ।
तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः ॥
नष्टे धर्मे मनुष्याणां व्यवहारः प्रकीर्तितः ।

मनुष्याणामृणादानादिविषयको विवादो व्यवहारः प्रकीर्तित इत्यथः ।

End:

इत्येवं धारयितुं विधान्तरेणापि हीनतास्मरणात् । हीनतायां गुरुत्वज्ञानन्तूत्तरोत्तरस्य दण्डभूयस्त्वज्ञापनार्थम् ।

उक्तञ्च कात्यायनेन—

अन्यवादी पदा(णा)न्पञ्च क्रियाद्वेष्टा(षा) पणान्दश ।
नोपस्थाता दश द्वौ च षोडशैव निरुत्तरः ॥
आहूतव्यपलायी च पणान्ग्राह्यस्तु विंशतिम् ।

अत्र तृतीयपञ्चमयोः दण्डप्राप्तौ.

No. 3211. व्यवहारनिर्णयः.

VYAVAHĀRANIRṆAYAḤ.

Substance, plam-leaf. Size, 16⅝ × 1⅛ inches. Pages, 106. Lines, 8 on a page. Character, Grantha. Condition, injured Appearance, old.

A work on Hindu law by Varadarāja.

Breaks off in Ṛṇādānaprakaraṇa.

Beginning :

लोके सर्वमनुष्याणां विवादे लुप्तधर्मके ।
निर्णयः क्रियतेऽस्माभिः श्रुतिस्मृत्यनुरोधतः ॥
सकलविवादपदानिर्णयार्थं स्मृत्यर्थनिर्णयः क्रियते ।

तत्र नारदः—

मनुः प्रजापतिर्यस्मिन् राजा राज्यमभूभुजत् ।
धर्मैकतानाः पुरुषाः तदासन् सत्यवादिनः ॥
तदा न व्यवहारोऽभून्न द्वेषो नापि मत्सरः ।
नष्टे धर्मे मनुष्येषु व्यवहारः प्रकीर्तितः ॥
द्रष्टा च तस्य न्यायस्य राजा धारयिता कृतः ।
धर्मैकताना धर्मैकविस्तारा . . . . . ॥

End :—See next number.

Colophon :

इति वरदराजीये धर्मशास्त्रे व्यवहारपरिकरणकाण्डं समाप्तम ॥

No. 3212. व्यवहारानिर्णयः.

VYAVAHĀRANIRṆAYAḤ.

Substance, palm-leaf. Size, $12\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 112. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

From about the close of Nikṣēpakāṇḍa to the end.

Same work as the above.

Beginning :—See the previous number.

यमः—

End :

एवं धर्मप्रवृत्तस्य राज्ञो दण्डधरस्य च ।
यशोऽस्मिन् प्रथते लोके स्वर्गे वासस्तथाक्षयः ॥

मनुः—

एवं सर्वानिमान् राजा व्यवहारान् समापयेत् ।
व्यपोह्य किल्बिषं सर्वं स याति परमां गतिम् ॥

Colophon:

इति श्रीमद्वरदराजीये व्यवहारनिर्णये प्रकीर्णकपदं समाप्तम् ॥

अङ्गिराः—

सहस्रपणमूल्यं तु तस्मै दद्यात्तु तद्धनात् ।
गां वा निष्कसुवर्णं वाप्यज्ञातिशवदाहकः ॥
ज्ञातिश्चापि तथा कुर्यात् एतत्प्रेतस्य तृप्तिदम् ।

बृहस्पतिः—

दशमांशं हरेत्तद्धि पञ्चमं सर्वमेव वा ।
मृतस्य . . . दद्यादज्ञातिशवदाहकः ॥
बहु . . . . . क्षस्य पञ्चमम् ।
अपुत्रस्यपितृ(स्याप्य)भार्यस्य सर्वमेवेति शौनकः ॥

Colophon:

इति वरदराजीये व्यवहारकाण्डस्समाप्तः ॥

No. 3213. व्यवहारनिर्णयः.

VYAVAHĀRANIRṆAYAḤ.

Substance, palm-leaf. Size, 15 × 1¾ inches. Pages, 394. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Copying is said to have been finished in the year Viṣu on Monday the 11th of Phālguna by Rāmacandra.

Two leaves in the beginning are much injured.

Same work as the above.

No. 3214. व्यवहारनिर्णयः.

VYAVAHĀRANIRṆAYAḤ.

Substance, palm-leaf. Size, 16¾ × 1¾ inches. Pages, 250. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Breaks off in Prakīrṇakavivādapada.

Same work as the above.

No. 3215. व्यवहारनिर्णयः.

VYAVAHĀRANIRṆAYAḤ.

Substance, palm-leaf. Size, 15⅔ × 1⅛ inches. Pages, 160. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in Dāyabhāga.

Same work as the above.

No. 3216. व्यवहारनिर्णयः.

VYAVAHĀRANIRṆAYAḤ.

Substance, palm-leaf. Size, 17¼ × 1½ inches. Pages, 106. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, new.

Incomplete. Breaks off in Viṣavidhi.

Same work as the above.

No. 3217. व्यवहारविषयः.

VYAVAHĀRAVIṢAYAḤ.

Substance, palm-leaf (Śrītāla). Size, 9¼ × 1½ inches. Pages, 52. Lines, 10 on a page. Character, Malayalam. Condition, slightly injured. Appearance, new.

On the same subject as the above.

Incomplete.

Beginning :

स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥

धर्मशास्त्रसदाचारविरुद्धेन मार्गेण परैराधर्षितः अभिभूतः यद्राज्ञे प्राड्विवाकाय वा आवेदयति विज्ञापयति चेत् यदि तदावेद्यमानं व्यवहारपदं प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्मको व्यवहारः तस्य पदं विषयः । तस्य चेदं सामान्यलक्षणम् । स च द्विविधः ।

End :

यो याचितकमादाय तमदत्वा दिशं व्रजेत् ।
ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात् ॥

अत्र मनुः—

कृतोर्द्धा(द्धा)रमदत्वा यो याचितस्तु दिशं व्रजेत् ।
ऊर्ध्वं मासत्रयात्तस्मात्तद्धनं वृद्धिमाप्नुयात् ॥ इति ।

यः पुनः स्वदेश एव स्थितः याचितो याचितं(न) ददाति ; तं याचनकालादारभ्य वृद्धिं दापयेद्राजा । यथाह—

स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः(तं) क्वचित् ।
तं ततोऽकारितां वृद्धिमनिच्छन्तं च दापयेत् ॥ इति ॥

अनाकारितवृद्धेरपवादो नारदेनोक्तः—

पण्यमूल्यं भृतिर्न्यासो दण्डो यश्च प्रकल्पितः ।
वृथादानाक्षिकपणा वर्धन्ते नाविवक्षिताः ॥

अविवक्षिता अनाकारिता इति । अधुना द्रव्यविशेषेण वृद्धिवि.

No. 3218. व्यवहारविषयः.

VYAVAHĀRAVIṢAYAḤ.

Pages, 136. Lines, 5 on a page.

Begins on fol. 62*a* of the MS. described under No. 3208.

Incomplete.

The leaves are not arranged in order nor are they numbered. The beginning and end cannot be determined.

No. 3219. व्यवहारविषयः.

VYAVAHĀRAVIṢAYAḤ.

Substance, palm-leaf. Size, 18⅝ × 1¾ inches. Pages, 214. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, new.

Concerning Hindu Law.

From Upanidhi to Daṇḍaprakaraṇa; and Dāyabhāga.

Beginning:

उपनिधिं प्रत्याह—

भाजनस्थमनाख्याय हस्तेऽन्यत्र यदर्प्यते ।
द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ॥

निक्षेपद्रव्यस्याधारभूतद्रव्यान्तरं भाजनं करण्डादि; तत्स्थं भाजनस्थद्रव्यं रूपसङ्ख्यादिविशेषम् । अनाख्याय अकथयित्वा । मुद्रितमन्यहस्ते रक्षणार्थं विस्रम्भादर्प्यते स्थाप्यते; तद्द्रव्यमौपनिधिकमुच्यते ।

यथाह नारदः—

असङ्ख्यातमविज्ञातं समुद्रं यन्निधीयते ।
तं जानीयादुपनिधिं निक्षेपं गणितं विदुः ॥

End:

इदानीं गोपान् प्रत्युच्यते—

यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत्तथा ।
प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः ॥

गोस्वामिना प्रातःकाले यथा गणयित्वा समर्पिताः पशवः; तथैव सायङ्काले गोपः गोस्वामिने पशून् विगणय्य प्रत्यर्पयेत् । प्रमादात्स्वाप-

राधेन मृतान् नष्टांश्च पशून् । कृतवेतनः प्रकल्पितवेतनः गोपः स्वामिने दाप्यः । वेतनकल्पना च नारदेनोक्ता—

गवां शताद्वत्सतरी धेनुः स्याद्विंशताद्धृतिः ।
प्रतिसंवत्सरं गोपे सम् ॥

No. 3220. व्यवहारविषयवचनानि.

VYAVAHĀRAVIṢAYAVACANĀNI.

Pages, 18. Lines, 9 on a page.

Begins on fol. 1*a* of the MSS. described under No. 1781.
Extracts from authorities relating to Hindu Law.

Beginning:

उपष्टम्भकविषयः ।

मनुः—

अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव पश्यति ॥
निजधर्माविरोधेन . . . यतो भवेत् ।
सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ॥

कात्यायनः—

स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञैर्मध्यैर्द्विजोत्तमैः ।
धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैः ॥

मनुः—

यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्वयः(म्) ।

बृहस्पतिस्तु—

लोकवेदज्ञधर्मज्ञास्सप्त पञ्च त्रयोऽपि वा ।
यत्रोपविष्टा विप्रास्स्युस्सा यज्ञसदृशी सभा ॥

End :

नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरम् ।
देशकालातिपत्तौ वा गृहीत्वा स्वयमर्पयेत् ॥
विक्रेतुर्दर्शनाच्छुद्धिस्स्वामी द्रव्यं नृपो दमम् ।
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी ॥
आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ।

No. 3221. सरस्वतीविलासः.

SARASVATĪVILĀSAḤ.

Substance, palm-leaf. Size, 15¼ × 1⅛ inches. Pages, 336. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Vyavahāra complete.

A digest of Hindu Law by Pratāparudradēva of Kaṭakanagarī (Cuttack). In the I O. Catalogue, page 419(*a*), he is said to have reigned over Orissa in the early part of the 16th century, probably from 1503 to 1524 or 1532 A.D.

Beginning :

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥
वन्देमहि महीयांसमंसलम्बिजटाधरम् ।
यत्कङ्क . . . . . ॥
. . . शचीवरं पशुपतिं दिशाचीवरं
सुरालयशरासनं सुकृतिहृद्विहारासनम् ।
विमुक्तविविधामयं विमलचित्तमेधामयं
पुरां समधिकद्विषं पुनरुपैमि शोकद्विषम्) ॥

* * * *

नीलाद्रिशेखरमणिं नितरां स्मरामि ॥

ज्योतिर्मये वपुषि यस्य सितेतरत्वं
कञ्जेक्षणस्य गगनात्मतयैव नूनम् ।
श्रीवीररुद्रनृपतेः श्रेयमातनोतु
नीलं . . . . . ॥

* * *

. . . हृदयपङ्कजमध्यभाग-
संरोधनादिव समुद्भिररक्तभावम् ॥ ४ ॥

प्रतापश्रीरुद्रं नृपमवतु दुर्गापदयुगं
सरक्तं रक्तौघैर्महिषदनुजोरस्थलभवैः ।
शुभ . . . . . .
. . . सिन्दूरैः परिचयवशेनारुणचणम् ॥ ५ ॥

अथ कृतिप्रणेतृवंशावतारोऽवतार्यते—

* * * *

अस्तीश्वरस्याष्टममूर्तिरेष स्वास्तिप्रदः सम्प्रति दीप्तियोषः ।
अस्तोदयाद्रीश्वरमस्तकाग्रविस्तारितैकाश्वकनत्खुराग्रः ॥

प्रतापिणं द्वारमसौ प्रतापी प्रतापवस्तुप्रतिमानभूमिः ।
प्रतापरुद्रस्य कुलाग्रगण्यः प्रतापभानुः प्रथमो ग्रहाणाम् ॥

कुलेऽभवन्नंशुमतो नृपालास्तले भुवो दिक्पतितुल्यलीलाः ।
बिलेशयाधीशभुजाकराळा बलेन लब्धक्षितिचक्रवाळाः ॥

तदन्वये कामगिरिप्रसादलब्धप्रभावो रघुनामकोऽभूत् ।
तदात्मजो बाहुजमौळिरत्नमजस्रिलोकीविनुतप्रतापः ॥

तस्मादसूत सुतमिन्दुमतीन्दुकल्पं कल्पद्रुमप्रसवकल्पिततल्पभाजम् ।
जम्भारियुद्धसखमिद्धयशोनिधानं सम्भावितं समिति पङ्क्तिरथाभिधानम् ॥

परः पुमान्पङ्क्तिरथादयासीदासीमवासीकृतकीर्तिपूरः ।
रामाभिधस्सोमसमानवक्त्रश्श्रीमानसौ धीरवराग्रगण्यः ॥
श्रियः पतिः स्वावतरप्रयोजनं प्रतापलङ्केश्वरसूदनात्मकम् ।
गुरूक्तिचर्यामिषतोऽनुषङ्गतश्चकार नूनं कृतिनामियं विधा ॥
ततः कुशोऽभूदरिमस्तकाङ्कुशः कुशावतीशस्स कुशेशयाननः ।
ततोऽतिथिर्नाम समिद्धविक्रमस्सपर्ययावर्जितनिर्जितातिथिः ॥
वंशे रघूणामुदपादि राजा भूजानिराधिक्यसमिद्धतेजाः ।
समाकृतिः श्रीकपिलेन्द्रनामा सीमातिशायीश्वरतुल्यधामा ॥

* * * *

चोळद्रविळनेपाळपाण्ड्यमाळवकेरळाः ।
कपिलेन्द्रनृपे क्षुब्धे युद्धे कर्णाटकीर्तयः ॥
यस्यापाङ्गे च कपिले कपिलेश्वरभूभुजः ।
अखिलाङ्गान्यपाङ्गानि रक्तान्यासन्नहो द्विषाम् ॥

सा पार्वती नाम यथार्थनामा यावाप सापत्न्यमिलारमाभ्याम् ।
करं गृहीत्वा कपिलेश्वरस्य स गामसापत्न्यमदाम(ता)नीत् ॥
सा पार्वती सकलगण्यगुणातिरेकं भूपालमौळिमणिरञ्जितपादपीठम् ।
तस्मादसूत पुरुषोत्तमनामधेयं विस्मारितारिधरणीधरभागधेयम् ॥

* * *

रूपाम्बिका रूपितरम्यशीलो(ला) भूपालमौळेः पुरुषोत्तमस्य ।
कलत्रमासीत्कमलायताक्षी समोमया सा रमया च वाचा ॥
जपैस्तपोभिः स्वयमर्जितैरसावसावि सावित्रकुलाधिपाग्रणीः ।
सरूपया सामजयानया(नया) नयाधिकः श्रीवरवीरभूपतिः ॥

* * * *

प्रतापरुद्रः प्रथितः प्रतापभानुस्त्रिलोकेषु तुलाविहीनः ।
चित्रादिकस्वातिविशाखगत्या तुलां समारोहति तिग्मभानोः ॥

* * * *

न हि विचित्रं वीररुद्रोऽपि पद्माश्लिष्टतनुः ।

* * * *

स्वयं पुरुषोत्तमोऽपि पुरुषोत्तमतनयः, स्वयं पुरुषोत्तमतनयोऽपि पुरुषोत्तमजनकः, स्वयं पुरुषोत्तमजनकोऽपि पुरुषोत्तमप्रियसेवकः

* * * *

राजाधिराजराजपरमेश्वरः प्रतापरुद्रो गजपतिर्नाम ।

अत्र वर्णयितृवर्ण्ययोरभेदैकनियतयोरप्यवस्थाभेदेन भेदकथनमेकस्यैव कवेस्सहृदयत्ववन्न विरुद्ध्यते । स चायं वीररुद्रो गजपतिरयोध्यामिवायोध्यां मधुरामिव मधुरां द्वारवतीमिव द्वारवतीमवन्तीमिवावन्तीं मायामिव मायां वारणासिकामिव वारणासिकाम्; अपि च काळीमिव विश्वेश्वराधिष्ठितामयोध्यामिवेक्ष्वाकु(कु)लसन्मार्गां काञ्चीमिव कामकोटिपुण्यकोटिसमेतां मधुरामिवोग्रसेनपरिपालितां द्वारवतीमिवानकदुन्दुभिघोषसमेतां महानदीजलमध्यमध्यासीनममरपुरीप्रतिबिम्बमिवं भूकान्ताकटकं कटकनगरीं पद्मालयेलामहि(ळा)मिस्समं समा(सम्मा)नयन् प्रतिदिवसविहितराजैकनियतव्यवहाररूपधर्माचरणमाचरन् यथाविहितसभामण्टपान्तरे सभ्यप्राड्विवाकामात्यपुरोहितज्योतिर्विदादिसहितो विज्ञानयोगीभारुच्यपरार्कमेधातिथ्यसहायचन्द्रिकादिबहुग्रन्थैकवाक्यतापर्यालोचनवशायातक्लेशो मा भूदिति सकलस्मृतिसमुच्चयमतिगभीरं प्रसन्नतरं नातिविस्तृतं प्रबन्धं प्रस्तौति । अत्रेदं गमनिका—

* * * *

Colophon:

इति वीरगजपतिगौडेश्वरनवकोटिकर्णाटकलबरगेश्वरशरणागतजमुनापुराधीश्वरहुकसाहिसुरत्राणशरणरक्षणश्रीदुर्गावरपुत्रपरमपवित्रचरित्रराजाधि-

राजराजपरमेश्वरश्रीवीरप्रतापरुद्रदेवमहाराजविरचिते स्मृतिसङ्ग्रहे सरस्वती-विलासे वंशावतरणं नाम प्रथमविलासः ॥

* * * *

यद्यपि मन्वादिस्मृतिषु आचारकाण्डः पूर्वं प्रतिपादितः, तदनन्तरं व्यवहारकाण्डः, तदनन्तरं प्रायश्चित्तकाण्ड इति काण्डत्रयं क्रमशो निरूपितम्; अस्मिन् सर्वस्मृतिसङ्ग्रहरूपे न्धि(ग्रन्थेऽ)पि तत्स्मृत्यनुसारेण तदुक्तक्रममवलम्ब्यैव आचारकाण्डनिरूपणानन्तरं व्यवहारकाण्डस्य निरूपणं युक्तम्; तथापि व्यवहारकाण्डः प्रक्रम्यते । तत्र व्यवहारदर्शने राज्ञ एवाधिकारः.

End:

मनुरपि—

"एवं सर्वानिमान्राजा व्यवहारान् सदा नयन् ।
(व्यपो)ह्य किल्बिषं सर्वं ब्रह्मलोके महीयते ॥" इति ।

कामक्रोधौ तु संयम्य योऽर्थे धर्मेण पश्यति ।
प्रजास्तमनुवर्तन्ते समुद्रं सरितो यथा ॥

अमी ननु मुनीश्वरा मनुवसिष्ठयोगीश्वरा
निबन्धनकृतोऽप्यमी रुचिकुलार्कयोगीश्वराः ।
गता विगतमत्सरा भवतु वा भवानीपतिः
स तु(पु)ष्यतु तरां मम स्मृतिनिबन्धवाग्वैखरीम् ॥

Colophon:

इति वीरश्रीगजपतिगौडेश्वर . . . . . श्रीप्रतापरुद्रदेवमहाराजविरचितस्मृतिसङ्ग्रहसारस्वतविलासे व्यवहारकाण्डे प्रकीर्णकाख्यस्य पदस्य विलासः ॥

समाप्तश्च व्यवहारकाण्डः ॥

पिङ्गळाब्दे राधशुक्लद्वितीयाबुधवासरे ।
सरस्वतीविलासोऽयं लिखितो मातृकाक्रमात् ॥

No. 3222. सरस्वतीविलासः.

SARASVATĪVILĀSAḤ.

Substance, palm leaf. Size, 19¾ × 1¼ inches. Pages, 88. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Vyavahāra, incomplete. Breaks off in Dāyabhāga.

Same work as the above.

No. 3223. सरस्वतीविलासः.

SARASVATĪVILĀSAḤ.

Substance, palm-leaf (Śrītāla). Size, 16½ × 2¾ inches. Pages, 62. Lines, 16 on a page. Character, Grantha. Condition, good. Appearance, new.

Dāyabhāga in Vyavahāra, complete.

Same work as the above.

No. 3224. सरस्वतीविलासः.

SARASVATĪVILĀSAḤ.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 159. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, new.

Dāyaprakaraṇa in Vyavahāra, complete.

Same work as the above.

No. 3225. सरस्वतीविलासः.

SARASVATĪVILĀSAḤ.

Substance, palm-leaf. Size, 18⅛ × 1⅜ inches. Pages, 320. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

From Sambhūyasamutthāna to the end of Dāyabhāga in the Vyavahārakāṇḍa.

Incomplete.

Same work as the above.

No. 3226. संस्कारकौस्तुभः.

SAṀSKĀRAKAUSTUBHAH

Pages, 27. Lines, 7 on a page.

Begins on fol. 14*a* of the MS. described under No. 3180.

Complete.

A work on adoption : by Anantadēva.

Beginning :

अथ संस्कारकौस्तुभे द(त्त)कविधिः । अथ दत्तके ग्राह्याग्राह्यत्वविवेकः ।

अत्र शौनकः—

ब्राह्मणानां सपिण्डेषु कर्तव्यः पुत्रसङ्ग्रहः ।
तदभावे सगोत्रे वा न चान्यत्र तु कारयेत् ॥ इति ।

अत्र च सपिण्डेष्वपि भ्रातृसुतो मुख्यः, तदलाभे सगोत्रस्सपिण्डोऽपि यः कश्चित्, तदभावे त्वसगोत्रसपिण्डः, तदभावे असपिण्डस्सगोत्रः, तदभावे असपिण्डोऽसगोत्रोऽपि ; तत्रापि भागिनेयदौहित्रवर्जम् ; विरुद्धसम्बन्धापत्त्या पुत्रत्वबुध्यनर्हभ्रातृपितृव्यमातुलवर्जञ्च ।

End:

दत्तपुत्र्या अपि स्वीकार उक्तविधिना कार्यः । वक्ष्यामि पुत्रसङ्ग्रहमित्यादिगतपुत्रपदस्य पुमान् पुत्र इत्यादिप्रयोगमूलेन वृत्तिक(कृ)दुक्तन्यायेन पुंवीसाधारण्यात् दानप्रतिग्रहविधिषु उद्देश्यविशेषणं पुंस्त्वविवक्षया इतिहासपुराणेषु कुन्त्यादीनां दत्तकत्वोक्तेश्च । पत्न्यभावे सा रिक्थं लभेत दुहितृत्वात् ॥

सतां सन्तोषसिद्ध्यर्थं दत्तपुत्रविधिर्मया ।
अकार्यनन्तदेवेन देवस्यैव मुदेऽस्तु सा(सः) ॥

Colophon:

श्रीमदापदेवसूनुना अनन्तदेवेन कृते संस्कारकौस्तुभे दत्तकविधिः ॥

No. 3227. संस्कारकौस्तुभः.

SAṂSKARAKAUSTUBHAḤ.

Substance, paper. Size, 12½ × 8 inches. Pages, 19. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Dattakavidhi, complete.

Same work as the above.

III. DIGESTS–(SPECIAL).

(7) ŚAṄTI.

The works mentioned in this sub-division relate to the rules for the performance of certain ceremonies in propitiation of planetary agencies, for removing and obviating diseases or for averting the evil consequences of bad omens.

No. 3228. अंशबलिः.

AMŚABALIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 98*b* of the MSS. described under No. 2898.

Complete.

Regarding the propitiatory rites performed for averting certain evil influences connected with any particular Amśa or degree in a man's Rāśi or sign of nativity.

Beginning :

अंशबलिः—

अतः परं प्रवक्ष्यामि अंशकाख्यं बलिं क्रमात् ।
महारोगहतानां च आयुरारोग्यसिद्धये ॥
तिथिवारर्क्षबल्यादौ पश्य(प्रशा)न्तिश्च नृणां यदि ।
अंशकादिबलिं कुर्यात् भक्त्या तद्गतमानसः ॥
तत्र वक्ष्यामि देवेश शृणुष्व सुमना(समा)हित(ः) ।
भौमान्ते यदि चेद्व्याधिः भवेन्मरणसूचकः ॥

End :

व्याधीनां चैव सर्वेषामारम्भे बलिमाचरेत् ।
मोहादज्ञानतो लोभात् न कुर्यान्नैव शाम्यति ॥

Colophon :

इत्यंशबलिः ॥

No. 3229. अतिरुद्रशान्तिः

ATIRUDRAŚĀNTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 2854.

Extracted from Mṛtyuñjayakalpa.

A work on propitiating Rudra with a view to remove various maladies, the effects of bad dreams, of astral influences, etc.

Complete.

Beginning :

रुद्रशान्तिविधिं वक्ष्ये जपहोमार्चनं क्रमात् ।
नानारोगहतानां च दुस्स्वप्नभयशङ्किनाम् ॥
बालयव्व(यौव)नवृद्धानां ग्रहदोषवतां नृणाम् ।
विषकृत्रिमदोषाणां रोगाणां महतामपि ॥
वातपित्तकफाद्यैश्च पीडितानां विशेषतः ।
शीतज्वरादिदुष्टानां भूतप्रेतपिशाचिनाम् ॥

End :

पुत्रपौत्रैः परिवृतः पुष्टिमान् बलवान्नरः ।
सर्वैश्वर्यसमायुक्तः जीवेद्वर्षशतं नरः ॥

Colophon :

इति मृत्युञ्जयोक्तरुद्रशान्तिविधिः ॥

No. 3230. अद्भुतोत्पातशान्तिः.

ADBHUTŌTPĀTAŚĀNTIḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 71*b* of the MS. described under No. 2898.

Relates to certain rites performed for averting the evil effects of observing certain ominous and extraordinary phenomena.

Complete.

Beginning:

उत्पातानां च सर्वेषां शान्तिं वक्ष्यामि शौनकः ।
आश्चर्यमद्भुतं पश्येल्लक्षणेन समाहितः ॥
दिव्यानि चान्तरिक्षाणि भौमानीति त्रिधा भवेत् ।
रश्मिहीनं रविं पश्येद्रवौ छिद्रं च भेदनम् ॥
नक्षत्रचन्द्रसूर्याणां महोल्कापातनं तथा ।
दिवोल्कापातनं तद्वत् दिवा नक्षत्रदर्शनम् ॥

End:

अग्नेः पश्चात् पत्नीपुत्रसमेतस्य उपरिष्टाद्दत्विजः अभिषेकं कुर्युरित्याह शौनकः ॥

Colophon:

इति शौनकीये अद्भुतोत्पातशान्तिः (समाप्ता) ॥

No. 3231. अद्भुतशान्तिः.

ADBHUTAŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 55*a* of the MS. described under No. 2840.

Complete.

Same work as the above.

No. 3232. अद्भुतोत्पातशान्तिः.

ADBHUTŌTPĀTAŚĀNTIḤ.

Substance, palm-leaf. Size, 11½ × 1 inches. Pages, 33. Lines, 3 on a page Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 17*a*.

The other works herein are :—Apāmpratiṣṭhāvidhiḥ 1*a*, Grāmapratiṣṭhā 6*b*, Dussvapnaśāntiḥ 33*b*, Vidyudagniśāntiḥ 39*a*, Gajaśāntiḥ 40*b*, Aśvaśāntiḥ 45*a*, Pūrvāsāḍhānakṣatrajananaśāntiḥ 58*a*, Saṅkrāntyabhiṣēkaḥ 69*b*, Udyānapratiṣṭhā 73*a*, Grahaṇaśāntiḥ 79*a*, Kēśaśāntiḥ 86*a*, Kṛṣṇacaturdaśījananaśāntiḥ 88*b*, Rajaśvalāśāntiḥ 90*b*.

Complete, but 4 leaves are wanting in the body of the book.

Same work as the above.

No. 3233. अनावृष्टिशान्तिः.

ANĀVṚṢṬIŚĀNTIḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 25*a* of the MS. described under No. 3029.

Complete.

Treats of certain rites to be performed on occasions of severe drought, with a view to bring down rain.

Beginning :

विधातृपौष्णादितिदस्रवायुविश्वद्विदैवेन्दुहरित्रयेषु ।
सौम्येन्दुवागीशसितेश(षु) वृष्टेर्जपं प्रकुर्यादथ शुक्लपक्षे ॥
तिथावरिक्ते जलखेटलग्ने जलांशके केन्द्रगतेषु सत्सु ।
यजेत्पूर्वं गणाधीशं वरुणं सुरनायकम् ।
ग्रहा(न्) संपूज्य विधिवच्छङ्करस्याभिषेचनम् ॥
ऋश्यशृङ्गं तथा वायुं कार्तवीर्यं महाबलम् ।
पूजयित्वा ततः कुर्यात्तल्लिङ्गैर्वारुणैर्जपम् ॥
विशेषान्नाभिपर्यन्तं जलमध्ये विधानतः ।
स्थित्वा जपं प्रकुर्याच्च पश्चाद्धोमं समाचरेत् ॥

End :

प्रचोदयादित्येकाक्षरगायत्रीविधिं कुर्याज्ज्वरैर्विमुक्तो भवतीत्याह भगवान् बोधायनः ॥

No. 3234. अनावृष्टिशान्तिः—(शौनकीया.)
ANĀVṚṢṬIŚĀNṬIḤ (ŚAUNAKĪYĀ).

Pages, 16. Lines, 4 on a page.

Begins on fol. 28*a* of the MS. described under No 3029.

Similar in character to the above.

Incomplete.

Beginning :

वर्षतौ तु यदा भूमावनावृष्टिस्तु वर्तते ।
कोटिहोमं तथा कुर्यात्तदर्धं लक्षमेव वा ॥
अयुतं वा प्रकुर्वीत इ(ऐ)न्द्रैर्वारुणसूक्तकैः ।
देवालये तटाकस्य समीपे वा सुकानने ॥

End :

एहि पर्जन्य, एहि इन्द्र, एहि वरुण, एहि आवर्तन पुष्करावर्तन मेख(घ).

No. 3235. अपमृत्युञ्जयशान्तिः.
APAMṚTYUÑJAYAŚĀNTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 32*a* of the MS. described under No. 2898.

Relates to a ceremony to be performed with a view to avert unnatural death.

Complete.

By Śaunaka.

Beginning :

अपमृत्युञ्जयं होमं वक्ष्यामीह द्विजन्मनाम् ।
कुर्यात्त्रिजन्मनक्षत्रे विषुवे संक्रमे तथा ॥
पौर्णमास्यामथावास्यां(याञ्च) ग्रहणे चन्द्रसूर्ययोः ।
समस्तक्लेशकालेषु यथाविधि समाहितः ॥
स्नात्वा शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ।
अलंकृत्य शुचौ देशे पुण्याहं वाचयेत्ततः ॥

End :

धन्यं यशस्यमायुष्यमारोग्यं पुष्टिवर्धनम् ।
अपमृत्युज(ञ)यं होममारभेत पुनः पुनः ॥

Colophon :

इति शौनकोक्तापमृत्युञ्जयशान्तिः (समाप्ता) ॥

No. 3236. अपां प्रतिष्ठा.
APĀMPRATIṢṬHĀ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 90*b* of the MS. described under No. 2840 wherein it is mentioned as Kūpādipratiṣṭhā.

Regarding the rites to be performed for the sanctification of wells, tanks, etc.

Complete.

Beginning :

अथातोऽपां प्रतिष्ठायाः कल्पं वक्ष्यामि शौनकः ।
नवे तटाके खाते वा वापीकूपसरित्सु च ॥
कुर्युर्द्विजातयो होमं शुद्धये च जलाशये ।
अयने चोत्तरे वापि पूर्वपक्षे शुभेऽहनि ॥

End :

अनेन विधिना कार्यमात्मनो भूतिमिच्छता ।
एवं वाप्य(ा)श्च कूपाश्च(स्य) सरितः खनने तथा ॥
इदं धन्यं यशस्यं च शान्तिपुष्टिकरं तथा ।
आयुष्यं पुण्यधर्म(र्म्य) च महापातकनाशनम् ॥

Colophon :

इति शौनकीये अपां प्रतिष्ठाविधिः पञ्चमः खण्डः ॥

No. 3237. अमाप्रथमरजोदर्शनशान्तिः.

AMĀPRATHAMARAJŌDARŚĀNAŚANTIḤ.

Substance, palm-leaf. Size, 12⅔ × 1¼ inches. Pages, 2. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 74*b*. The other works herein are :—

	Fol.		Fol.
Pañcamāristaśāntiḥ ..	1*a*	Navagrahaślōkāh ..	47*a*
Viśākhānakṣatraśāntiḥ ..	2*b*	Śāntikhaṇḍaprayōga ..	48*a*
Tiṣyanaksatraśāntiḥ ..	3*b*	Grahaṇaśāntiḥ 51*a*, 102*a*,	104*a*
Uttarānaksatrajāta-śāntiḥ	5*b*, 49*a*	Punassandhānam	57*a*
Pūrvāṣhāḍhānakṣatra-jātaśāntiḥ	6*a*, 49*b*	Kuhūśāntiḥ	67*a*
Citrānakṣtrajātaśāntiḥ	6*a*, 49*b*	Śāntividhiḥ	69*a*
Āślēsānakṣatrajātaśāntiḥ ..	7*a*	Gōmukhajananaśāntiḥ ..	71*a*
Mūlānakṣatraśāntiḥ ..	9*b*	Garbhādhānapuṁsavana-sīmantōnnayanaṁ ..	76*a*
Jyēsṭhānakṣatraśāntiḥ ..	19*a*	Pūrvaprayōgaḥ	80*a*
Gōmukhajananaśāntiḥ ..	22*a*	Aṣṭagrahayōgaśāntiḥ ..	86*a*
Ēkanaksatrajātaśāntiḥ ..	26*a*	Pañcagrahayōgaśāntiḥ ..	87*b*
Vyatīpātajananaśāntiḥ ..	26*b*	Prathamārtavaśāntiḥ 91*b*,	99*b*
Nakṣatraśāntiḥ	29*a*	Śāntyadhidēvatā	99*a*
Viṣanāḍījātaśāntiḥ ..	36*a*	Saṅkrāntiśāntiḥ ..	..105*b*
Aśvatthavratakalpaḥ ..	38*b*	Rōgayuktanakṣatra-śāntiḥ	..107*a*
Sahasrabhōjanavidhiḥ ..	41*a*	Vāyustutiḥ ..	..116*a*
Aśvatthōpanayanavidhiḥ..	43*a*	Viśvāmitrasaṁhitā	..120*a*
Aśvatthavivāhavidhiḥ ..	45*a*	Śakunaviṣayaḥ ..	..133*a*

Regarding the ceremony performed for averting the evil consequences conceived to be associated with a girl's attaining puberty on a newmoon day.

Complete.

Beginning :

अमावास्या(तिथ्या)न्तु नारीणां प्रथमार्तवसंभवे[त्] ।
कुलहानिर्द्रव्यहानिः पतिहानिर्दरिद्रता ॥

तस्माच्छास्त्रोक्तविधिना पतिस्तच्छान्तिमाचरेत् ।
तिलपात्रं पितृप्रीत्यै दत्वा शान्तिमथाचरेत् ॥

End:

एवं यः कुरुते भक्त्या सर्वदोषविवर्जितः ।
धनधान्यसमायुक्तो बहुसन्तानवान् सुखी ॥

Colophon:

इति अमावास्याप्रथमार्तवशान्तिस्समाप्ता ॥

No. 3238. अलक्ष्मीशान्तिः

ALAKṢMĪŚĀNTIII

Pages, 4 Lines, 7 on a page.

Begins on fol. 109*a* of the MS. described under No. 2898.
A work on certain propitiatory rites for averting ill-luck.
Taken from the Yāmala.
Complete.

Beginning:

अलक्ष्मीहरकुम्भाभिषेकं तु कमलासनः ।
श्रीमतां च नृपाणां च बालानां राजयोषिताम् ॥
सुकुमाराङ्गिनां चैव यूनां चैव विशेषतः ।
दुर्लक्षणसुखायोगादलक्ष्मीग्रहणं तथा ॥
अलक्ष्म्यागमनद्वारं संक्षेपाच्छृणु पुत्रक ।
दम्पत्योः कलहाच्चैव सदा निष्ठुरभाषणात् ॥
भृग्वङ्गारादिने वापि गृहालङ्करणं न चेत् ।
दीपहीनाच्च(हानेश्च) सन्ध्यायां गोग्रासस्याप्रदानतः ॥

End:

गन्धपुष्पाक्षतादीनि दद्यात्सम्मृष्टभोजनम् ।
पुत्रपौत्रधनैर्युक्तो भूतिमान् स्यान्न संशयः ॥

Colophon :

इति यामलोक्तालक्ष्मीहरकुम्भाभिषेकविधिः ॥

No. 3239. अलक्ष्मीहरतैलदानम्.

ALAKṢMĪHARATAILADĀNAM.

Substance, palm-leaf. Size, 13½ × 1 inches. Pages, 2. Lines, on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 25*a*. The other works herein are :—Gōmukhajananaśānti 1*a*, Grahayōgaśānti 2*a*, Jyēṣṭhānaksatrajananaśānti 9*a*, Viṣaghatikājananaśānti 11*a*, Puṣyanakṣtraśānti 11*b*, Grahaṇajananaśānti 12*a*, Pañcamāriṣṭaśānti 13*b*, Aśanihataśānti 14*b*, Prathamārtavaśānti 16*a*, Vāyasapravēśaśānti 25*b*, Nakstrahōma 28*b*, Sthānanighaṇtu 29*a*, Vaiśvadēvaprayōga 30*a*, Āyuṣyahōma 31*a*.

Regarding the ceremonial gift of oil for averting ill-luck.

Complete.

Beginning :

अलक्ष्मीहरणसं(णे)प्राप्ते नानादोषो भवेत्तदा ।
रोगपीडादरिद्रादिनानादुश्शीलदुःखवान् ॥

तदा काले भक्तियुक्तो दानं सद्यस्समाचरेत् ।
अष्टादि(?)कष्टदिवसे तैलाभ्यङ्गं समाचरेत् ॥

* * * *

दिवा वा यदि वा रात्रौ स्वगृहे देवमन्दिरे ।
प्रस्थमात्रां(त्रान्) विनिक्षिप्त्वा(प्य) नवकुम्भं विनिक्षिपेत् ॥

पूरयेत्तिलतैलेन अलक्ष्मीमत्र निक्षिपेत् ।
त्रपुला(णा)पलमात्रेण कारयेद्विधिवत्ततः ॥

End:

दक्षिणार्थं कांस्यपात्रं वस्त्रं वा धान(न्य)मेव वा ।
अलक्ष्मीदोषनिर्मुक्तस्सुखी भोगी धनी नरः ॥

Colophon:

इत्यलक्ष्मीहरतैलदानविधिस्समाप्तः ॥

No. 3240. अशनिहतशान्तिः.

ĀŚANIHATAŚĀNTIH.

Pages, 4 . Lines, 6 on a page. Character, Nandināga.

Begins on fol. 136*a* of the MS. described under No. 2898

Regarding certain rites for averting the inauspiciousness of a lightning-stroke.

Complete.

Beginning:

अशनिहतकल्पं व्याख्यास्यामः—

वसन्ते ग्रीष्मे शरदि काले वा देवगृहे प्रासादे राजगृहे ग्राममध्ये गोष्ठे जनसमूहे स्वसमूहे धनधान्यसमृद्धे बृन्दावने पनसनारिकेळक्रमुकतरुवनचूतवनान्तरे अशनिहते वा शतक्रतुसघाने(स्थाने) यजमानस्य क्षेत्राभिवृद्धिः.

End:

ब्राह्मणान्भोजयित्वा यथाशक्ति दक्षिणान्ददाति ; आचार्याय दक्षिणान्ददात्यशनिहतस्य शान्तिर्भविष्यतीत्याह भगवान् बोधायनः ॥

Colophon:

इति बोधायनोक्ताशनिहतशान्तिः ॥

No. 3241. अश्वशान्तिः.

AŚVAŚĀNTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 86*a* of the MS. described under No. 2898.

Regarding certain propitiatory rites intended to make a hor strong and healthy.

Beginning:

बोधायनः—

अश्वशान्तिं प्रवक्ष्यामि { तेषामारोग्यसिद्धये । / तेषां रोगोपशान्तये । }

भानुवारे च सङ्क्रान्ते अयने विषुवद्वये ॥
दिनद्वये व्यतीपाते द्वादश्यामश्वभेऽपि वा ।
अथवा भास्करे शान्तिं संयुतेरविशेषतः ॥

End:

लोकपालाश्च सन्तुष्टाः पिशाचा डाकिनीगणाः ।
भूतप्रेताश्च (सिद्धाश्च) गन्धर्वा यक्षराक्षसाः ॥

Colophon:

इति नारदीये अश्वशान्तिः ॥

No. 3242. अश्वशान्तिः.

ĀŚVAŚĀNTIḤ.

Pages, 28. Lines, 4 on a page.

Begins on fol. 45*a* of the MS. described under No. 3232.

Regarding certain propitiatory rites for averting the inauspic ousness of owning a horse with bad marks.

Beginning:

अथ शान्तिं प्रवक्ष्यामि नृपाणां पुष्टिवर्धनम् ।
आगत्य वाजिशान्तोय(लायां) वेदिं कृत्वा विधानतः ॥

अरत्निमात्रविस्तारं पञ्चाङ्गुलसमन्वितम् ।
तस्यास्तु पश्चिमे देशे होमकुण्डं प्रकल्पयेत् ॥

End:

(आयु)रारोग्यमैश्वर्यं प्राप्य कीर्तिं च शाश्वतम् ।
परत्र च भयं (नास्ति भुवि भाग्यं) च वर्धते ॥

Colophon:

इति शौनकीये अश्वशान्तिस्समाप्ता ॥

No. 3243. अष्टग्रहयोगशान्तिः.

AṢṬAGRAHAYŌGAŚĀNTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 86*a* of the MS. described under No. 3237.

Extracted from Jyautiṣārṇava.

Regarding certain propitiatory ceremonies that have to be performed, if eight Grahas (planets) happen to come together in one and the same Rāśi or sign in respect to the horoscope of an individual.

Beginning:

अथातस्संप्रवक्ष्यामि ग्रहाणामघशान्तये ।
एकराशि(शौ)ग्रहास्सर्वे प्रत्येकं स्थाननामभिः ॥
जन्मस्थानेषु मृत्युः स्यात् द्वितीये धननाशनम् ।
तृतीये धनमाप्नोति चतुर्थे धननाशनम् ॥

* * *

पञ्चमष्ठ[illegible]न्तत्र ग्रहस्थापनमाचरेत् ।
तत्तद्ग्रहाकृतिं कुर्यात् सुवर्णेन स्वशक्तितः ॥

End:

ऋत्विग्भ्यो दक्षिणां दद्यात् सवस्त्रप्रतिमादिकम् ।
ब्राह्मणान् भोजयेत्पश्चात् यथावित्तानुसारतः ॥

भक्तिभावेन यः कुर्यात् सर्वदो(ष)विवर्जितः ।
[यो]ग्रहयोगैश्च(गोत्थ)दोषौघत्यक्तसर्वसुखान्वितः ॥
धनवान् पुत्रवांश्चैव नीरोगी जायते नरः ।

Colophon:

इति श्रीज्यौतिषार्णवे शौनकोक्ताष्टग्रहयोगशान्तिस्समाप्ता ॥

No. 3244. आयुष्यहोमविधिः

ĀYUṢYAHŌMAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 54*b* of the MS. described under No. 2840.

Regarding a ceremony performed with a view to attain long life. Contains at the end the name of the Ṛṣi, Chandas and Dēvatā of the Mantra to be used in the ceremony.

Complete.

Beginning:

आयुष्यहोमं वक्ष्यामो(मि) शौनकोऽहं द्विजन्मनाम् ।
कुर्याद्विजन्मनक्षत्रे विषुवे सङ्क्रमे तथा ॥
पौर्णमास्यां तथा दर्शे ग्रहणे चन्द्रसूर्ययोः ।
स्नातश्शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ॥

End:

आचार्यं पूजयेत्पश्चाद्धेनुं दद्यात्सवत्सकाम् ।
ऋत्विग्भ्यो दक्षिणां दद्याद्वस्त्रं धान्यं तिलं तथा ॥

Colophon:

इति शौनकीये आयुष्यहोमविधिः ॥

No. 3245. आरोग्यबलिः
ĀRŌGYABALIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 106*a* of the MS. described under No. 2898.

Regarding the rites connected with the offering of a sacrifice to Indra, with the object of restoring young children to proper health.

Complete.

Beginning:

अथारोग्यबलिं कुर्यात् बालारोग्यप्रदायकम् ।
न पुनर्जायते रोगो यः कुर्याद्भक्तितत्परः ॥

End:

वज्री शचीपतिर्देवो बालारोग्यं प्रयच्छ मे ।
धनं देहि सुखं देहि आरोग्यं देहि मे प्रभो ॥
सुतसन्तानसौभाग्यं चिरायुत्वं(ष्टं) प्रयच्छ मे ।
बलं देहीति मन्त्रेण नमस्कारमथाचरेत् ॥

No. 3246. आश्लेषाऋक्षजननशान्तिः.
ĀŚLĒṢĀṚKṢAJANANAŚĀNTIḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol 115*b* of the MS. described under No. 29[illegible].

Regarding the rites for averting the evil consequences of the birth of a child when the moon is in the asterism Āślēṣa.

Complete.

Beginning:

आश्लेष(ा)ऋक्षजननशान्ति वक्ष्यामि शौनकः ।
आद्यपादे शुभः प्रोक्तो द्वितीये धनगण्डत(क)ः ॥
तृतीये मातृगण्डस्स्यात् चतुर्थे पितृगण्डत(क)ः ।
तस्माच्छान्तिं प्रवक्ष्यामि गण्डदोषस्य शान्तये ॥

End :

पुत्रपौत्रैः परिवृतो धनधान्यसमन्वितः ।
आयुर्बुद्धिं तथारोग्यं लभते स नरस्सुखी ॥

Colophon :

इत्याश्लेषानक्षत्रजननशान्तिः ॥

No. 3247. आश्लेषानक्षत्रजातशान्तिः.

ĀŚLĒṢĀNAKṢATRAJĀTAŚĀNTIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No 3237.
From Jyautiṣārṇava.
Complete.
Same subject as in the above.

Beginning :

आश्लेषानक्षत्रजननशान्तिरुच्यते ।

बृहस्पतिरुवाच—

आश्लेषाऋक्षजातानां (वक्ष्ये शान्ति)मशेषतः ।
जातस्य द्वादशाते(हे) तु शान्तिं कर्म समाचरेत् ।
उत्तरे प्रथमं पादं हस्ते चैव द्वितीयकम् ॥
पादं तृतीयं चित्रायां पूर्वाषाढे चतुर्थकम् ।
एतेषु नक्षत्रजाते(चर्क्षपादे)षु पितरं हन्ति ते सु(तत्सुतः) ॥

End :

गृहाशीर्वचनं श्रुत्वा प्रणिपत्य समापयेत् ।
सर्वकामप्रदं तेषां वेदोक्तायुर्भविष्यति ॥

Colophon :

इति श्रीज्यौतिषार्णवे शान्तिकर्मणि आश्लेषानक्षत्रजननशान्तिः समाप्ता ॥

No. 3248. आश्लेषाशान्तिः.

ĀŚLĒṢĀŚĀNTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 38*a* of the MS. described under No. 2840.

By Śaunaka.

Beginning :

आश्लेषाशान्तिकल्पोऽयं वक्ष्यामोत(क्ष्यते) दोषशान्तये ।
अभुक्तमूलसंभवं परित्यजेत्स बालकं

* * *

प्रतिपदन्त्यपादतः फलं तदेव सार्पभे
तदुक्तदोषशान्तये विधेय (एष सर्वदा) ॥

End :

JVARAVIDHIḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 26*a* of the MS. described under No. 3029.

Regarding certain mystic rites supposed to cure fever.

Incomplete.

Beginning:

अथातो ज्वरविधिं व्याख्यास्यामः—

त्रिशिरसं त्रिपादं त्रिहस्तमीश्वरस्य शक्तिरूपं ध्यात्वा ज्वरराजाय स्वाहेति ज्वरशान्त्यर्थं चरुणाज्येन . . . . . अष्टशतमष्टाविंशतिहोमं कुर्यादनेन मन्त्रेण नमस्कारं कुर्यात्.

End:

एतस्माद्भवतीदमायुरधिकं सञ्चिन्त्य नैसर्गिकं
निर्दिष्टञ्च पराशरादिमुनिभिः जाते फलं निश्चितम् ।

No. 3321. ज्वरविधिः.

JVARAVIDHIḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 49*a* of the MS. described under No. 2824.

On the same subject as the above.

Complete.

Beginning :

अथातो ज्वरविधिं व्याख्यास्यामस्त्रिशिरसं त्रिपादं त्रिहस्तमीश्वरस्य शक्तिरूपं ध्यात्वा ज्वरराजाय स्वाहेति ज्वरशान्त्यर्थं चरुणाज्येन वाष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिर्वा(तिं वा) होमं कुर्यात् ।

End :

भस्मायुधाय विद्महे एकदंष्ट्राय धीमहि । तन्नो ज्वरः प्रचोदयात् ॥

इति ज्वरगायत्रीजपं कुर्वन् ज्वरैर्विमुक्तो भवतीत्याह भगवान् बोधायनः ॥

No. 3322. ज्वरहरस्तोत्रम्.

JVARAHARASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 37*a* of the MS. described under No. 2898.

Gives the prayer known as Kubēra-mantra for the curing of fever.

Complete.

Beginning :

अष्टदलकर्णिकायाः षट्कोणम् ।

कुबेरं ते मुख(खं)रौद्रं नन्दिमा[illegible] ।

ज्वरं मृत्युभयं घोरं ज्वरं नाशय मे ज्वर ॥

त्रीणि त्रीण्यष्टदलेषु ज्वर इत्येकैकं षट्कोणेषु ज्वर इति वदेत्—देव(द)त्तस्य ज्वरं नाशयेति ।

* * * *

तरुणज्वरशान्त्यर्थं कुबेरमन्त्रस्य, गणक ऋषिः, अनुष्टुप्छन्दः, कुबेररुद्रो देवता.

* * * *

अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम् ।
माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥

म(ा)हेश्वरस्समाक्रन्द(क्रान्त)ः वैष्णवेन बलान्वितः ।
अलब्ध्वाभयमन्यत्र भीतो माहेश्वरज्वरः ॥

शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः ।

ज्वरः—

नमामि(नौमि स्तु) त्वानन्तशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥

End:

यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयम् ।
इत्युक्तोऽच्युतमानम्य गतो माहेश्वरज्वरः ॥

Colophon:

इति ज्वरस्तोत्रं संपूर्णम् ॥

No **3323.** तापज्वरहररुद्रबलिः.

TĀPAJVARAHARARUDRABALIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 40*a* of the MS. described under No. 28

On a sacrifice to Rudra for the curing of high fever.

Complete.

Beginning :

अथ रुद्रबलिः—

महातापज्वरो मर्त्यः ज्वरदाहयुतोऽपि वा ।
अङ्गतापा(त्) ज्वरी तत्र नमकं चमकं जपेत् ॥
हरेर्ना(रना)मसहस्रं वा शुद्धैस्तिमधुराप्लुतैः ।
आम्रस्य पर्णैरुत्तार्नर्जुहुयाज्जातवेदसम् ॥

End :

द्वादशाहं दशाहं वा सप्तरात्रमथापि वा ।
उत्तमे मध्यमे नीचे बलिरक्षा विधीयते ॥

Colophon :

इति रुद्रबलिः ॥

No. 3324. तिथिबलिः.

TITHIBALIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 93*a* of the MS. described under No. 2898.

On sacrifices intended for the removal of diseases, the nature of the sacrifices being determined by the lunar day on which the attack of illness occurres.

Complete.

Beginning :

प्रतिपद्या(द्यु)द्भवेद्व्याधिव(र्व)र्तते पञ्चरात्रकम् ।
अग्निस्तु देवता तत्र तण्डुलेन बलिं हरेत् ॥
अग्ने नयेति मन्त्रेण रक्तपुष्पाम्बरावृतैः ।
आग्नेय्यां दिशि मध्याह्ने रोगनाशो भविष्यति ॥

End :

अविधिज्ञो बलिं दद्यात् व्याधिस्तत्र न शाम्यति ।
विधानज्ञो बलिं दद्यादारोग्यमचिराद्भवेत् ॥

No. 3325. तिलहोमविधिः.

TILAHŌMAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 95*b* of the MS. described under No. 2840.

Rules for the performance of a ceremony, wherein sesamum seeds are thrown into a hallowed fire, as an offering to appease angry gods and to remove the evil effects of all inauspicious influences and occurrences.

Complete.

Beginning :

तिलहोमविधिं वक्ष्ये यथावदनुपूर्वकम् ।
सर्वपापक्षयकरं सर्वारित्राविनाशनम् ॥
सर्वशान्तिकरं गुह्यं यदुक्तं स्मृतिचोदितम् ।
तिलान् संशोध्य पूर्वेद्युर्यथा प्रक्षाल्य वारिणा ॥

End

दुस्स्वप्नाद्या विनश्यन्ति भूतप्रेतैर्विमुच्यते ।
मुच्यते सर्वपापेभ्यो(भ्यः) सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति तिलहोमविधिः ॥

No. 3326. तिलायुतहोमः.

TILĀYUTAHŌMAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 118*b* of the MS. described under No. 2898.

Regarding the ceremony of offering 10,000 fire-offerings with sesamum seeds, with a view to guard against all kinds of evil.

Complete.

Beginning :

देशानां शान्तिदं राज्ञां शत्रुभ्यो भीतिनाशनम् ।
सर्वसंपत्करं पुण्यं सर्वोपद्रवनाशनम् ॥

सर्वव्याधिहरं सौम्यं यशोवृद्धिकरं महत् ।
धा(ध)न्यं धर्म्यं शुभायुष्यं वक्ष्ये होमायुतं द्विजाः ॥

End:

नारिकेलफलैर्होमः पीनसादिशिरोरुजे ।
सर्वाभावे तु सर्वत्र घृताक्तैर्जुहुयात्तिलैः ॥

No. 3327. तिष्यनक्षत्रशान्तिः.

TISYANAKṢATRAŚĀNTIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 36 of the MS. described under No. 3237.

A Śānti or pacificatory ceremony performed when a child is born under the lunar asterism Pusya.

Complete.

Beginning:

अथ तिष्यनक्षत्रजननशान्तिविधिरुच्यते—

तिष्ये च कर्किलग्ने च पूर्वाषाढे च कार्मुके ।
तस्मिन् जाते कुमारे तु पिता हन्ति न संशयः ॥

उत्तरे प्रथमे पादे पुष्ये चैव तु मध्यमे ।
पूर्वाषाढे(ढा)न्त्यपादे च चित्रार्धं पूर्वमेव तु ॥

पुत्रा(त्रे) जाते पिताल्पायुः स्त्रीषु जातासु मातरम्(:) ।

End:

बृहस्पतये स्वाहा । तिष्याय स्वाहा । ब्रह्मवर्चसाय स्वाहा । इत्युपहोमः ।

उपहोम इमे(मा) हुत्वा तिलव्रीहींस्ततो हुने(त्) ।
व्याहृतीविदितः(तं) सम्यक् गण्डदोषप्रशान्तये ॥

No. 3328. तृचकल्पः.
TṚCAKALPAḤ.

Pages, 36. Lines, 4 on a page.

Begins on fol. 32*a* of the MS. described under No. 1582.

Regarding the method of propitiating the sun-god with the Ṭṛcamantra.

Complete.

Beginning :

वासुदेवं नमस्कृत्य अर्जुनः परिपृच्छति ।
त्रि(तृ)चमन्त्रस्य माहात्म्यं श्रोतुमिच्छाम्यहं प्रभो ॥

श्रीकृष्ण उवाच—

अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत् ।
उद्यन्नद्योति मन्त्रोऽयं सौरः पापप्रणाशनः ॥
रोगघ्नश्च द्विषघ्न(द्घ्न)श्च भुक्तिमुक्तिफलप्रदः ।
कण्वेन च पुरा दृष्टो गुह्यः परमसिद्धिदः ॥
पुत्रस्य रोगनाशाय ख्यातो लोकहिताय च ।
तेन चाराधितो देवः त्रि(तृ)चमन्त्रेण भास्करः ॥

End :

हरिमाणं निदध्मसि—मरीचिं तर्पयामि । उदगादयमादित्यः—आदित्यं तर्पयामि । विश्वेन सहसा सह—सवितारं तर्पयामि ।

No. 3329. त्रिपुष्करयोगशान्तिः.
TRIPUṢKARAYŌGAŚĀṆTIH.

Pages, 3. Lines, 7 on a page.

Begins on fol. 49*b* of the MS. described under No. 2898.

On the Śānti or pacificatory ceremony to be performed when a child is born on a Sunday, Tuesday or Saturday which is associated with a Tripāda-Nakṣatra and the Tithi Bhadrā.

Complete.

Beginning :

मुक्तावल्याम्—[ग]

भद्रा तिथि(:) क्रूरक(त)रस्य वार(:) त्रिपादधिष्ण्या तृती(त्रित)यस्य योगः ।
त्रिपुष्करस्तत्र हृतं मृतं वा युद्धं प्रनष्टं त्रिगुणं विधत्ते ॥

भद्रे भूमिप्रदानं स्यात् त्रिपदर्क्षे हिरण्यतः ।
वारेषु चादिदैवत्ये वासोदानं विधीयते ॥
त्रयाणां सन्निपाते च त्रीणि दानानि कारयेत् ।

End :

ब्राह्मणान् भोजयेत् पश्चात् भुञ्जीयादाशिष(स्ततः) ।
सर्वदोषं हरत्याशु कुलगोत्राभिवृद्धये ॥

Colophon :

इति रुद्रयामले त्रिपुष्करयोगशान्तिः ॥

No 3330. त्रिपुष्करशान्तिः.
TRIPUṢKARAŚĀNTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 48*a* of the MS. described under No. 2898.

Same subject as the above.

Complete.

Beginning :

त्रिपुष्करमहायोगे मृतो यस्त्रिविधाकृतिः ।
तत्राशुभस्य शान्त्यर्थं रोमशो मुनिरब्रवीत् ॥
भानुर्भौमश्शनिश्चैव त्रिपादे भद्रया युते ।
त्रिपुष्करोऽसौ स्वे लग्ने द्रेक्काणे वावशान्तिकम्(काः) ॥

संवत्सरे मरिष्यन्ति सन्निकृष्टास्सपिण्डकाः ।
त्रयाणां यस्य वारे स्यात् मृतं नष्टं हृतं तथा ॥

End:

यथा तमो नश्यति भानुदर्शने हिमं य(त)था शान्तिविधानमिच्छतः ।
त्रिपुष्करोत्थं भय(माशु)नश्यति ग्रहोत्थदोषोऽपि च नश्यति ध्रुवम् ॥

Colophon:

इति त्रिपुष्करयोगे रोमशप्रोक्तशान्तिः ॥

No. 3331. त्रिविधान्तरालजननशान्तिः.

TRIVIDHĀNTARĀLAJANANAŚĀNTIḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 125*a* of the MS. described under No. 2973.

On the Śānti ceremony to be performed when a child is born in certain inauspicious astrological conjunctions.

Complete.

Beginning:

पितामहसंहितायाम—

मन्दरस्थं सुखासीनं देवदेवं महेश्वरम् ।
प्रणम्य शिरसा भक्त्या नारदं परिपृच्छति ।

ईश्वरः—

नक्षत्रतिथिलग्नानां गण्डानां त्रिविधं स्मृतम् ।
नवपञ्चचतुर्भान्तं द्व्येकार्धघटिकाः क्रमात्॥

तिथ्यृक्षगण्डे पितृमातृनाशो लग्नस्य गण्डे तनयस्य नाशः ।
सर्वेषां(र्त्र) नो जीवति हन्ति वंशं जीवन् पु(प)रस्ताद्धुवारणाश्वः ॥

End:

आयुरारोग्यमैश्वर्यं तुष्टिपुष्टिविवृद्धये ।
सर्वशान्तिकरं पुण्यं सौख्यं चैव प्रजायते ॥

Colophon:

इति पितामहसंहितायां त्रिविधान्तरालजननशान्तिः समाप्ता ॥

No 3332. दग्धयोगादिरजस्वलाशान्तिः.

DAGDHAYŌGĀDIRAJASVALĀŚĀNTIḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 126*b* of the MS. described under No. 2973.

On the Śānti to be performed when a girl attains maturity on a day with an inauspicious Yōga.

Complete.

Beginning:

अथातस्संप्रवक्ष्यामि शौनको मुनिपुङ्गवः ।
तस्य शान्तिं प्रवक्ष्यामि दग्धयोगेषु संभवेत् ॥

सुदिने वारनक्षत्रे सुयोगे करणान्विते ।
सुलग्ने च सुसंप्राप्ते दग्धयोगेषु मृत्युवत्(कृत्) ॥

आदौ षड्घटिकाकाले संप्राप्ते तु रजस्वला ।
तत्काले च व्यतीपाते वैधृतौ परिघेषु च ॥

End:

दग्धयोगादिरजस्वलादोषपरिहारद्वारा दम्पत्योरायुराभिवृद्धि[रिति] भू-(र्भू)यादित्यनुगृह्णन्त्विति वदेत् ॥

Colophon:

इति शौनकसंहितायां दग्धयोगादिरजस्वलाशान्तिकल्पस्समाप्तः ॥

No. 3333. दानमन्त्राः.

DĀNAMANTRĀḤ.

Pages, 5. Lines, 6 on a page. Character, Nandināgarī.

Begins on fol. 128*b* of the MS. described under No. 2898

On the Mantras to be used at the time of making a pious gift.

Incomplete.

Beginning :

कृतोत्तरीयको विप्रो अ(ह्य)न्तर्जानुकरस्तथा ।
उदङ्मुखाय विप्राय प्राङ्मुखो दानमाच(रेत्) ॥
(यज्ञ)साधनभूता या विश्वस्याघप्रणाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

End :

शय्यादानम्—

मृदुवस्त्रास्तृता शुद्धा मृदुतन्तुपरिच्छदा ।
शय्या सुखप्रदा नित्यमतः शान्तिं प्रयच्छ मे ॥

No. 3334. दिवाजाताश्वशान्तिः.

DIVĀJĀTĀŚVAŚĀNTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 84*b* of the MS. described under No. [illegible].

On the Śānti to be performed when a horse is born during day time.

Complete.

Beginning :

जाताण्डजातसन्तानां स्फुलिङ्गानां च वारिधेः ।
कथिता शान्तितः पूर्वं शालिहोत्रानुसारतः ॥
दिवाजातहयानां च किं कर्तव्यं द्विजोत्तम ।

सूतः —

दिवाजातोद्भवं वाहं शत्रूणां निकषा पुरा ।
विसृज्य तेषां नाशाय संग्रामाद्वा विसर्जयेत् ॥
जातमात्रस्य राजन्यदोषास्स्युर्बहुशो यतः ।
शालिहोत्रानुसारेण कथयामि महामते ॥
उदयात्प्रथमे यामे भर्तारं स विहन्यते(हन्ति च) ।

End:

अश्वाश्च नाशमायान्ति स्वयं वा नाशमश्नुते ।
करोति चेन्नृपो भूमौ राजा भवति निश्चयः ॥

Colophon:

इति दिवाजाताश्वशान्तिः ॥

No **3335.** दिवानक्षत्रादिदर्शनशान्तिः.

DIVĀNAKṢATRĀDIDARŚANAŚĀNTIḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 82*b* of the MS. described under No. 2898.

On the Śānti to be performed when one sees stars, &c., during day time.

Complete.

Beginning:

उत्पातशान्तिं वक्ष्यामि नृपाणामभिवृद्धये ।
माघादिपञ्चमासेषु मध्याह्नात् पूर्वतो यदि ॥
अहनक्षत्रताराणां दर्शनं नृपनाशनम् ।
अपराह्णे देशनाशं स्त्रीगर्भपशुनाशनम् ॥
आषाढादित्रये मासे दिवा नक्षत्रदर्शने ।
ताराग्रहादर्शनेऽपि राजस्त्रीमरणं (ध्रुवम्) ॥

End:

नक्षत्रदर्शनोत्पातदोषास्सर्वे लयं ययुः ।
सुभिक्षारोग्यमतुलमायुरारोग्यवान् सदा ॥

Colophon:

इति सप्तर्षिप्रोक्तदिवादर्शनशान्तिः ॥

No. 3336. दुस्स्वप्नशान्तिः.
DUSSVAPNAŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 30*b* of the MS. described under No. 2898.
Deals with a rite to avert the evil influence of bad dreams.
Complete.

Beginning:

दिवा वा यदि वा रात्रौ यः स्वप्नं यदि पश्यति ।
तत्क्षणादुत्थितो विद्वान् पादप्रक्षालनादिकम् ॥
दक्षिणाभिमुखास्तिष्ठन् भस्मधाम(स्मादाय)करं(रे) न्यसेत् ।
भस्मन्युक्ता तु तत्स्वप्नं मुखश्वासान् विसर्जयेत् ॥
ततस्स्नानं प्रकुर्वीत धौतवस्त्राम्बरावृतः ।
पुण्याहवाचनं कुर्यादाचार्यं वरयेदथ ॥
स्वगृहे स्वप्नदेशे च गोमयेनानुलिप्य च ।
तिलराशीन् समासाद्य जलकुम्भं विनिक्षिपेत् ॥

End:

ब्राह्मणान् भोजयेत् पश्चात् यथाविभवसारतः ।
एवं यः कुरुते शान्तिं दुस्स्वप्नाघं व्यपोहतु ॥

Colophon:

इति रुद्रयामले दुस्स्वप्नशान्तिः ॥

No. 3337. दुस्स्वप्नशान्तिः.
DUSSVAPNAŚĀNTIḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 132*a* of the MS. described under No. 2973.

On the same subject as the above.

Complete.

Beginning :

दिवा वा यदि वा रात्रौ दुस्स्वप्नं यदि पश्यति ।
तत्क्षणाद्बुद्धिमांश्चैव पादप्रक्षालनादिकम् ॥
दक्षिणाभिमुखो भूत्वा भस्मादाय करे क्षिपेत् ।
लिखेद्भस्मनि दुस्स्वप्नं मुखश्वासाद्वि(न्वि)सर्जयेत् ॥

End :

भक्त्या तु दक्षिणां दद्यान्नमस्कृत्येष्टदेवताम् ।
सर्वदुस्स्वप्नजनितं(तो) दोषं(षो) नश्यत्यसंशयः ॥

Colophon :

इति दुस्स्वप्नशान्तिस्समाप्ता ॥

No. 3338. दुस्स्वप्नशान्तिः.
DUSSVAPNAŚĀNTIḤ.

Pages, 11. Lines, 3 on a page.

Begins on fol. 33*b* of the MS. described under No. 3232.

On the same subject as the above.

Complete.

Beginning :

अथ स्वप्नानि वक्ष्यन्ते दुर्निमित्ताद्भुतानि च ।
आदित्यं वार(थ) चन्द्रं वा विगतद्युतिकं तथा ॥

पतनं वाथ नक्षत्रं तारकादींश्च वा यदि ।
वे(वी)क्षेपे(त) मानवस्स्वप्ने मरणं शोकमाप्नुयात् ॥

End:

ब्राह्मणान् भोजयेच्छक्त्या सुशीलान्वेदपारगान् ।
भक्ष्यैश्च पायसाद्यैश्च द्वादशापि बहूनि च(नपि) ॥
होमशेषं स्वयं प्राश्य ब्राह्मणेभ्यो नयेत्तथा ।
अनेन विधिना यस्तु शान्तिं कुर्वीत यत्नतः ॥
तस्य वर्षशतायुष्यं भवत्येव न संशयः ॥

Colophon:

इति शौनकीये दुस्स्वप्नोत्पातशान्तिस्समाप्ता ॥

No. 3339. दूर्वाहोमविधिः.

DŪRVĀHŌMAVIDHIH.

Pages, 2. Lines, 8 on a page.

Begins on fol. 54*a* of the MS. described under No. 2840.

On a Hōma with Dūrva grass intended to confer on one long life and good health

Complete.

Beginning:

शौनकोऽहं प्रवक्ष्यामि अपमृत्युज(ञ्ज)यं ततः ।
आपूर्यमाणपक्षे तु कल्याणे सुदिने तिथौ ॥
त्रिजन्मसिद्धयोगे वा शुभवारे सुलग्नके ।
आयुरारोग्यसिद्ध्यर्थमेतत् कर्म समाचरेत् ॥
देवालये स्वगृहे वा कृत्वा स्थलमनुत्तमम् ।
इध्माबर्हिश्च दूर्वाज्यं पयो दधिमधूनि च ॥

End:

सवत्सां गामनड्वाहं हिरण्यं कांस्यवाससं(सी) ।
स च मृत्युमतिक्रम्य दीर्घमायुरवाप्नुयात् ॥

Colophon:

इति शौनकीये अपमृत्युञ्जयदूर्वाहोमाविधिः ॥
ऋष्यादिकमत्रत्यानां सूक्तानां पूर्वमेवोक्तम् ॥

No. 3340. दूर्वाहोमः.
DŪRVĀHOMAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 64*b* of the MS. described under No. 2898.
Complete.
Seems to be a different version of the above work.

Beginning:

शौनकोऽहं प्रवक्ष्यामि अपमृत्युञ्जयं तथा ।
आपूर्यमाणपक्षेषु कल्पासु (ल्याणे)सुदिने तथा ॥
तिथिर्क्षे(थ्यृक्ष) सिद्धयोगे वा शुभवारे सुलग्नके ।
आयुरारोग्यसिद्ध्यर्थमेतत् कर्म समाचरेत् ॥

* * * *

दधिर्मधु(दधिमुधु) पयोऽक्ताभिर्दूर्वाभिस्त्रिसप्तभिर्युतम् ।
हुत्वाष्टोत्तरसाहस्रमष्टोत्तरशतं तु वा ॥
कृष्णधेनुमलंकारं ब्राह्मणाय निवेदयेत् ।
सर्वारिष्टमतिक्रम्य सर्वरोगविनाशनम् ॥

End:

ऐश्वर्यं राजसंमानं पुत्रपौत्रप्रवर्धनम् ।
[illegible]र्त्युमतिक्रम्य दीर्घमायुष्यमाप्नुयात् ॥

Colophon :

इति शौनकीये दूर्वाहोमस्समाप्तः ॥

No. 3341. दृग्दोषशान्तिः.

DṚGDŌṢAŚĀNTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 107*b* of the MS. described under No. 2898.

On the Śānti intended to avert the evil consequences of being seen by people supposed to have the evil eye.

Complete.

Beginning :

दृग्दोषशान्तिं वक्ष्यामि दृष्टिदोषहरा(रां)यच(श्चा) ।
येन केनापि विधिना दृष्टिदोषं(षो) भवेद्यदि ॥
स्नाने भोजनकाले च वस्त्रगन्धादिभूषणैः(णे) ।
आस्थानमण्डपे वापि विवाहे यदि संगरे ॥

End :

एवं यः कुरुते भक्त्या सर्वदामयवर्जितः ।
जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥

Colophon :

इति शैवागमोक्तदृग्दोषशान्तिः ॥

No. 3342. धनिष्ठादिमरणशान्तिः.

DHANIṢṬHĀDIMARAṆAŚĀNTIḤ.

Substance, paper. Size, 6½ × 5½ inches. Pages, 3. Lines, 20 page. Character, Telugu. Condition, good. Appearance,

Begins on fol. 8*a*. The other works herein are :—

Nakṣatraśānti 1*a*, Vyatīpātādijananaśānti 9*a*, Nakṣatrābhicāravidhāna 10*a*, Āndhrakathā 12*a*.

On the Śānti intended to avert the evil consequences supposed to result from a death in a house on a day associated with the Dhaniṣṭhā asterism.

Beginning:

वसुनक्षत्रमरणाद्वत्सरं न विशेद्गृहम् ।
वारुणे दशमासाच्च(स) पूर्वप्रोष्ठपदेऽष्टकम् ॥
उत्तरे प्रोष्ठपद्यां (दि)तु सप्तमासं विवर्जयेत् ।
षण्मासांश्चैव रेवत्यां वर्जयेन्मृतिहेतवे ॥

ब्राह्मणान् भोजयित्वा सर्वारिष्टशान्तिर्भवतीत्याह भगवान् बोधायनः ॥

अथ रोहिणीपुनर्वसूविशाखाधनिष्ठादिपञ्चकनक्षत्रेषु मृतानां दानादिविशेषानाह—

रोहिणीनक्षत्रे मृतस्य गृहपरिशुद्ध्यर्थं दानादिविधिमाह यथा—

चत्वारिंशत्पले कांस्ये तिलान् संपूर्य यत्नतः ।
शुभ्रवस्त्रोपरि प्रजापतिं देवस्वरूपिणम् ॥

End:

रेवतीमृतशान्त्यर्थं पूर्वोक्तकांस्यपात्रे गोधूमान् संपूर्य रक्तवस्त्रोपरि सुवर्णप्रतिमायां पूष्ण(षण)मावाह्य कुङ्कुममिश्रितगन्धपुष्पैरभ्यर्च्य ब्राह्मणैरनुज्ञाप्य दानं दत्वा सुखी भवेदिति चाह भगवान् बोधायनः ॥

No. 3343. धन्वन्तरिशान्तिः.

DHANVANTARIŚĀNTIḤ.

Pages, 4. Lines, 7 on a page

Begins on fol. 50*b* of the MS. described under No. 2898.

By Vāgīśa.

On a Śānti or magical pacificatory rite intended to serve as a remedy for various kinds of troublesome diseases.

Complete.

Beginning:

धन्वन्तरिमहाशान्तिं महाव्याधिसमुद्भवे ।
वक्ष्ये वागीशनामाहं सर्वशास्त्रानुसारतः ॥
नियमैरौषधैः पथ्यैः निवातशयनादिभिः ।
जपैर्दानैश्शान्तिहोमैर्देवतातर्पणैरपि ॥
रुद्राभिषेकं(के) देवस्य अश्वत्थस्य प्रदक्षिणं(णे) ।
महाव्याधिनिवृत्तिस्स्यात् नान्यथा नात्र संशयः ॥

End:

चन्द्रौघकान्तिममृतात्मकरैर्जगन्ति
सञ्जीवयन्तममृतात्मसुखं परेशम् ।
ज्ञानं सुधाकलशमेव च सन्दधानं
शीतांशुमण्डलगतं स्मरतात्मसंस्थम् ॥
मूर्ध्नि स्थितादमृ(मु)त एव सुधां द्रवन्तीं
भ्रूमध्यगाच्च तत एव च तालुसंस्थात् ।
हार्दाच्च नाभिसदनादधरस्थिताच्च
ध्यात्वाभिपूरिततनुद्युति तं निहन्यात् ॥

Colophon:

इति धन्वन्तरिशान्तिः ॥

No **3344.** नक्षत्रगण्डशान्तिः.
NAKṢATRAGAṆḌAŚĀTIḤ.

Pages, 7. Lines, 4 on a page.

Begins on fol 104*a* of the MS. described under No. 2973.

On the Śānti or pacificatory rite to be performed in view to avert the evil consequences of one's birth under certain lunar asterisms considered astrologically to be dangerous to life.

Complete.

Beginning :

अथ अभुक्तनक्षत्रगण्डजननशान्तिरुच्यते—

नक्षत्रगण्डजातानां शान्तिं वक्ष्यामि पूर्ववत् ।
पूषाश्विन्योः सर्पपैतृ(पित्र्य) ज्येष्ठामूलाख्यसन्धिषु ॥
जातमात्रान्मातृपितृशिशो(श्च)रिष्टं भवेत्तदा ।
नाडीद्वयं तु सर्पान्ते मात्र[ा]रिष्टं करोति सः ॥

End :

एवं यः कुरुते भक्त्या गण्डदोषात् प्रमुच्यते ।
आयुरारोग्यसंपन्नो जीवेद्वर्षशतं नरः ॥

Colophon :

इति सप्तर्षिप्रोक्तनक्षत्रगण्डजननदोषशान्तिः ॥

No. 3345. नक्षत्रबलिः.

NAKṢATRABALIḤ.

Pages, 6. Lines, 7 on a page

Begins on fol. 95*b* of the MS. described under No. 2898.

On the offering of certain oblations with a view to the alleviation of diseases caused by the evil influence of astrologically inauspicious lunar asterisms.

Complete.

Beginning :

अथ नक्षत्रबलिरुच्यते—

अश्विन्यामुत्थितो व्याधिर्नवरात्रेण मुञ्चति ।
मुद्गान्नेन बलिं दद्यादश्विनौ पूजयेदथ ॥
भरण्यामुत्थितो व्याधिः पञ्चरात्रेण मुञ्चति ।
तिलान्नेन बलिं दद्यात् यममभ्यर्चयेद्गुरुः ॥

End:

एवं यः कुरुते रोगी सर्वरोगात् प्रमुच्यते ।
चिरजीवी सुखी चैव नात्र सन्देहमाचरेत् ॥

Colophon:

इति रोगनक्षत्रबलिशान्तिः ॥

No **3346.** नक्षत्रशान्तिः.

NAKṢATRAŚĀNTIḤ.

Pages, 15. Lines, 6 on a page.

Begins on fol. 29*a* of the MS. described under No. 3237.

Relates to a ceremony to be performed with a view to propitiate the presiding deities of the twenty-seven lunar asterisms.

Complete.

Beginning:

अग्निर्नः पातु कृत्तिकाः । नक्षत्रं देवमिन्द्रियम् । इदमासां विचक्षणम् । हविरासन् जुहोतन । यस्य भान्ति रश्मयो यस्य केतवः । यस्येमा विश्वा भु(व)नानि सर्वा । स कृत्तिकाभिरभिसंवसानः । अग्निर्नो देवः सुविते दधातु । अग्नये स्वाहा । कृत्तिकाभ्यः स्वाहा ।

End:

अपपाप्मानं भरणीर्भवन्तु । निवेशनी यत्ते देवा अदधुः । (अप) भरणीभ्यः स्वाहा । राज्याय स्वाहा । अभिजित्यै स्वाहा ॥

No. **3347.** नक्षत्रहोमः.

NAKṢATRAHŌMAH.

Pages, 2. Lines, 6 on a page.

Begins on fol. 27*b* of the MS. described under No. 3239.

Similar in aim and character to the above work.

Incomplete.

Beginning :

शौनकोऽहं प्रवक्ष्यामि न(ा)क्षत्रं होममुत्तमम् ।
आयुरारोग्यसिद्ध्यर्थं द्विजानां ब्रह्मविद्द(वादि)नाम् ॥
अन्वाधानादिकं कृत्वा आज्यभागान्तसंयुतम् ।
अग्निः प्रजापतिस्सोमरुद्रादित्य(ा)बृहस्पतिः ॥

End :

विश्वे देवेति विश्वेभ्यो ब्रह्मजज्ञानं ब्रह्मणे ।
विष्णवे तविष्ठा साभ्युश्रावे देवेति वासरे ॥

No. 3348. नक्षत्रहोमः.

NAKṢATRAHŌMAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 62*a* of the MS. described under No. 2840
Same subject as that of the above.
Complete.

Beginning :

शौनकोऽहं प्रवक्ष्यामि हो(मं) नक्षत्रसंज्ञिकम् ।
आयुरारोग्यसिद्ध्यर्थं द्विजानां भावितात्मनाम् ॥
अन्वाधानादिकं कृत्वा आघारान्तश्च संज्ञितम् ।
अग्निः प्रजापतिस्सोमो रुद्रादित्य(ा)बृहस्पतिः ॥

End :

दद्याद्धिरण्यं धेनुं वा आचार्याय प्रयत्नतः ।
ब्राह्मणान् भोजयेत् पश्चात् सर्वकामार्थसिद्धये ॥

Colophon :

इति शौनकीये नक्षत्रहोमविधिः ॥

No. 3349. नरपतनशान्तिः.

NARAPATANAŚĀNTIH.

Pages, 3. Lines, 7 on a page.

Begins on fol. 111*b* of the MS. described under No. 2898.

On the Śānti to be performed when one falls upon another by accident, through laziness or other causes.

Complete.

Beginning:

ज्यौतिषार्णवे जैमिनिः—

प्रमत्तो वाप्रमत्तो वा निद्रालस्ययुतोऽपि वा ।
क्षयाङ्गेन च युक्तो वा दुर्बलादिप्रपाततः ॥
तैलादिसिक्तदेही वा अद्भुतालंकृतोऽपि वा ।
एतेषां प्राणिनां मध्ये वैषम्याद्या(द्यत्)प्रपातनम् ॥

End:

विप्रान् सन्तोषयेत् पश्चात् घृतपायसभोजनैः ।
अकस्मात् पतने दोषमरिष्टं याति तच्छ(संक्ष)यम् ॥

Colophon:

इति ब्रह्मपुराणे नरपतनशान्तिविधिः ॥

No. 3350. नवग्रहयज्ञः.

NAVAGRAHAYAJÑAḤ.

Pages, 8. Lines, 15 on a page.

Begins on fol. 179*a* of the MS. described under No. 1197.

On a ceremony to be performed for propitiating the nine Gr or deities presiding over the nine planets known to Indian astrol

Complete.

Beginning:

शुक्लाम्बरधरं विष्णुं . . . . सर्वविघ्नोपशान्तये ॥

अथातो ग्रहातिथ्यं बलिकर्मोपहारान् व्याख्यास्ये—

अश्रद्दधानमशुचिमजप्यत्यन्त(न्त्यक्त) मङ्गलम् ।
ग्रहा नयन्ति सुव्यक्तं पुरुषं यमसादनम् ॥
ग्रहाणामुग्रचेष्टानां नक्षत्रपथचारिणाम् ।
उपहारान् प्रवक्ष्यामि शान्त्यर्थं तु यथाविधि ॥

End:

यमं शनैश्चरं विन्द्या(द्या)त् राहुं कालं तथैव च ॥
केतुमग्निमयं विन्द्या(द्या)त् एवं देवं(वा) यथा ग्रहाः ।
देवता ग्रहरूपेण दर्शयन्ति शुभाशुभम्—इत्याह भगवान् बोधायनः ॥

No. 3351. नवग्रहशान्तिः.
NAVAGRAHAŚĀNTIḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 3302.

Same subject as that of the above.

Beginning:

. . . . . कनकं मणि(म्) ।
दैवज्ञाय ददौ नित्यं कुजदोषं(षो) विनश्यति ॥
कार्पाटं(सं) कनकं व्रीहींश्चन्दनागरुकुङ्कुमम् ।
दैवज्ञाय ददौ नित्यं बुधदोषं(षो) विनश्यति ॥

End:

सीसकं गन्धकं रज्जुं कर्पटं नीलमाषकम् ।
दैवज्ञाय ददौ नित्यं केतु दोषं(षो) विनश्यति ॥

No. 3352. नागप्रतिष्ठा.

NĀGAPRATIṢṬHĀ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 48*a* of the MS. described under No. 3302.

Regarding the rules for consecrating the image of serpent for worship. This ceremony is generally performed with a view to the begetting of children.

Complete.

Beginning:

अथ नागप्रतिष्ठां च वक्ष्ये सर्वहितावहाम् ।
सा चोदगयने शुक्लपक्षे नागतिथौ यथा ॥
अस्मिन् दिने स्थापनं च अहन्येव सुलग्नके ।
श्रावणे कार्त्तिके द्वन्द्वे माघफाल्गुनसंज्ञिके ॥

End:

शिल्पिना विहितं कृत्वा नयनोन्मीलनादिकम् ।
संपाद्य मृज्जलैस्स्नानं प्रक्षाल्य पयसा ततः ॥
तां मृज्जलैस्तु संशोध्य गायत्र्या प्रोक्ष्य वारिणा ।

एवं प्रकारेण नागबिम्बस्य शुद्धिं कृत्वा प्रतिष्ठास्थले निक्षिपेत्, तत्प्रतिष्ठां कुर्यात् ॥

No. 3353. नागप्रतिष्ठाविधिः.

NĀGAPRATIṢṬHĀVIDHIḤ.

Substance, paper. Size, $6\frac{7}{8} \times 4\frac{3}{8}$ inches. Pages, 19. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Same work as the above

Complete.

No. 3354. नागप्रतिष्ठा.

NĀGAPRATIṢṬHĀ.

Pages, 16. Lines, 15 on a page.

Begins on fol. 171*a* of the MS. described under No. 1197.

Same subject as the above.

Complete.

Beginning:

नागप्रतिष्ठा ।

पराशरः —

अथातस्संप्रवक्ष्यामि नागसंस्थापनं परम् ।
यस्यानुष्ठानमात्रेण मुच्यते सर्वकिल्बिषात् ॥
उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ।
सौम्यशुक्रार्यसोमानां वासरेषु विधीयते ॥
सार्पे भे वैष्णवे चान्द्रे तिष्यभे पितृभेऽपि वा ।
स्वातीयुग्मश्रविष्ठासु मैत्रभे मूलभेऽपि वा ॥

End:

एकैको वै । असुर्यं वा एतस्मात् । अग्नेः कृत्तिकाः । अन्तो वा एषः । अग्निर्नः पातु ॥

No. 3355. नागप्रतिष्ठाविधिः.

NĀGAPRATIṢṬHĀVIDHIḤ.

Pages, 10. Lines, 4 on a page.

Begins on fol. 94*b* of the MS. described under No. 2973.

Same subject as the above.

Complete.

Beginning:

सुसङ्कल्प्य विधानेन आचार्यस्सुसमाहितः ।
निर्ऋतिं सर्पनाथं वा वस्त्रयुग्मेन वेष्टयेत् ॥

आवाहनार्घ्यपाद्यैश्च गन्धपुष्पैस्तथैव च ।
धूपदीपैश्च नैवेद्यैः पूरयेन्मन्त्रपूर्वकम् ॥

End:

इत्थं संप्रार्थ्य नागेन्द्रं यजमानस्समाहितः ।
प्रतिमां वस्त्रयुग्मं च आचार्याय निवेदयेत् ॥

देवगन्धर्वदैत्यैश्च यक्षराक्षसपुङ्गवैः ।
संपूजितोऽसि नागेन्द्र तस्माच्छान्तिं प्रयच्छ मे ॥

No. 3356. नालवेष्टनशान्तिः.

NĀLAVEṢṬANAŚĀNTIḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 99*a* of the MS. described under No. 2973.

On the Śānti to be performed when a child is born with the umbilical chord wound round the body.

Complete.

From the Gārgyāsaṁhita.

Beginning:

अथातस्संप्रवक्ष्यामि गार्ग्येणोक्तं महात्मना ।
बालस्त्वायुप्रबद्धोथ(न्धोत्थ) दोषं(षः) तच्छान्तिरुच्यते ॥

* * * *

पादस्त्वायुर्मातृदोषं मातुलं चोपवीतकम् ।
बाहुमूले कण्ठमूले बन्धनं पितृदोषकम् ॥

End:

अवश्यमन्नशान्तिं च कारयेत्तु विचक्षणः ।
कृते तु पुत्रपौत्रादिसमेतस्सुखमश्नुते ॥

Colophon:

इति गार्ग्यसंहितायां नालवेष्टनजननशान्तिकल्पस्समाप्तः ॥

No. 3357. पञ्चग्रहयोगशान्तिः.

PAÑCAGRAHAYŌGAŚĀNTIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 87*b* of the MS. described under No. 3237.

On the performance of Śānti if five planets happen to meet in one's birth-asterism, or in the zodiacal sign of one's nativity.

Incomplete.

Beginning:

अथातस्संप्रवक्ष्यामि ग्रहयोगस्य लक्षणम् ।
यस्य त्रिजन्मनक्षत्रे राशौ लग्ने यदि स्थिते ॥
एकराशौ ग्रहास्सर्वे तस्य मृत्युर्न संशयः ।
द्वित्रिचतुर्ग्रहयोगे कलहं(हो) नाशञ्च(श्च) संक्षोभः ।
पञ्चग्रहयोगे(स्यात्) दुर्भिक्षं सङ्गमे तु षण्णान्तु ॥
क्षितिपतिचलनं विद्यात् प्रलयं गज(जग)तस्तु सीमानाम् ।

End:

कटकं कनं(न)कं धेनुं काश्मीरं रक्तचन्दनम् ।
दैवज्ञाय ददेन्निष्कं कर्मदोषापनुत्तये ॥
मौक्तिकं श्वेतवस्त्रञ्च शङ्खञ्च रजतन्तथा ।

* * * *

राजमाषं कृष्णतिलं सीसं कांस्यमथायसम् ॥
दीयते द्विजवर्याय सूर्यादीनां यथाक्रमम् ।
एवं यः कुरुते शान्तिं तस्य दोषापनुत्तये(नोदनम्) ॥

No. 3358. पञ्चमारिष्टशान्तिः.

PAÑCAMĀRIṢṬAŚĀNTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 96*a* of the MS. described under No. 2840.

On the Śānti prescribed for averting the evil supposed to result if the sun or any other inauspicious planet happens to be in the fifth place from one's house of nativity in the horoscope.

Complete.

Beginning:

जातस्य पञ्चमे लग्ने सूर्यादिग्रहसंस्थिते ।
पित्रादीनां त्वरिष्टं तु कुर्वन्ति च यथाक्रमम् ॥
तद्दोषपरिहारार्थं शान्तिं वक्ष्याम्यशेषतः ।
जातस्य द्वादशाहे वा जन्मर्क्षे वा शुभे दिने ॥

End:

एवं शान्तिं प्रकुर्याच्चेत् तस्य दोषो विनश्यति ।
सर्वारिष्टविनाशाय वेदोक्तायुर्भविष्यति ॥

Colophon:

इति मानवीये पञ्चमारिष्टशान्तिः ॥

No. 3359. पञ्चमारिष्टशान्तिः.

PAÑCAMĀRIṢṬAŚĀNTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 13*b* of the MS. described under No. 3239.

Complete.

Same work as the above.

No. 3360. पञ्चमारिष्टशान्तिः.

PAÑCAMĀRIṢṬAŚĀNTIḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 123*a* of the MS. described under No. 2973.

Same subject as the above.

Complete.

Beginning:

अथातस्संप्रवक्ष्यामि पञ्चमारिष्टशान्तये ।
लग्नस्य पञ्चमस्थाने सूर्यादीना(दिभि)रधिष्ठिते ॥
पिता माता च तद्भ्राता मातुलो जननी पिता ।
भगिनी मातुलश्चैव शिशुस्सर्वधनक्षयः ॥
तद्दोषपरिहारार्थं शान्तिकर्म समाचरेत् ।

End:

ब्राह्मणान् भोजयेद्यत्कां(च्छक्त्या)शतं चैव तदर्धकम् ।
एवं यः कुरुते शान्तिं तस्य दोषापनुत्तये(नोदनम्) ॥

Colophon:

इति शौनकीये पञ्चमारिष्टशान्तिस्समाप्तः(प्ता) ॥

No. 3361. पञ्चमारिष्टशान्तिः.

PAÑCAMĀRIṢṬAŚĀNTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3237.

Same subject as the above.

Complete

Beginning :

अथ पञ्चमारिष्टशान्तिविधिरुच्यते याज्ञवल्क्यः—

ग्रहादिभ्यो नरेन्द्राणामुच्छ्रयः पतनानि च ।
तथापि सर्ववर्णानां ग्रहेभ्यः पतनोच्छ्रयौ ॥
तस्मात्सर्वप्रयत्नेन शान्तिकर्म समाचरेत् ।
जनने पञ्चमस्थाने सूर्यस्यचयह(र्यादिग्रह)संस्थिते ॥
याज्ञवल्क्योक्तमार्गेण सम्पूर्तिं कर्तुमक्षमः ।

End :

चित्रवस्त्रेण संवेष्टच वारुणं कुम्भमेव च ।
पूर्वोक्तविधिना कृत्वा विप्राय च निवेदयेत् ॥

Colophon :

इति हेमाद्रौ दानकाण्डे शान्तिप्रकरणे याज्ञवल्क्योक्तपञ्चमारिष्ट-शान्तिस्समाप्तः(प्ता) ॥

No. 3362. पर्जन्यहोमविधिः.

PARJANYAHŌMAVIDHIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 75*a* of the MS. described under No. 2840.

Regarding the performance of certain Hōmas to bring about the falling of rain.

Complete.

By Śāunaka.

Beginning :

पर्जन्यहोमं वक्ष्यामि शौनेकोऽहं द्विजन्मनाम् ।
अनावृष्टौ सस्यनाशे दुर्भिक्षे ग्रहवक्रके ॥
तटाकाराममध्ये वा म(ण्ट)पं कारयेदथ ।
ग्रहयोगे शुभे लग्ने शुक्लपक्षे शुभे दिने ॥

End :

जलपूर्णं तटाकं स्यात्पर्जन्यस्य प्रसादतः ।
हरिमेव स्मरेन्नित्यं कर्मपूर्वापरेऽपि च ॥

Colophon :

इति शौनकीये पर्जन्यहोमविधिः ॥

No. 3363. पल्लीसरटपतनशान्तिः.

PALLĪSARAṬAPATANAŚĀNTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 37*b* of the MS. described under No. 2898.

On the Śānti performed to avert the unpropitiousness of a lizard or chameleon falling on certain parts of the body.

Complete.

Beginning :

अथातस्संप्रवक्ष्यामि शृणु शौनकनन्दन ।
पल्ल्याः प्रपातस्य फलं सरटस्य तथैव च ॥
शीर्षे राज्यश्रिया(योऽ)वाप्तिः फाले त्वैश्वर्यवर्धनम् ।
कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनम् ॥

End :

दश दानानि कुर्वीत ब्राह्मणान् भोजयेदथ ।
इत्थं शान्तिं प्रकुर्वीत जीवेद्वर्षशतं नरः ॥

Colophon :

इति शौनकीये पल्लीसरटपतनशान्तिः ॥

No. 3364. पितृजन्मर्क्षकुमारजननशान्तिः.

PITṚJANMARKṢAKUMĀRAJANANAŚĀNTIḤ.

Pages, 2. Lines. 4 on a page.

Begins on fol. 8*b* of the MS. described under No. 2973.

Deals with the ceremony to be performed if a son is born under the same lunar asterism as his father.

Complete.

Beginning:

पितामह उवाच—

पितृजन्मर्क्षकर्मक्ष(नामर्क्षे) जातस्सुत(सुते जाते) पितृ(तु)र्मृतिः ।
जन्मर्क्षे जन्मलग्नांशे . . . . . ॥
(सर्वदो)षप्रशमनं तन्नक्षत्राधिदैवतम् ।
ज्ञात्वा पूजां तु विधिवत्सुवर्णप्रतिमादिकम् ॥

End:

तन्मन्त्रेण यथापूर्वं हुनेदष्टोत्तरं शतम् ।
यथाशक्त्य[ा]नुसारेण कृत्वा ब्राह्मणभोजनम् ॥

Colophon:

इति ब्रह्मनारदसंवादे पितृपुत्रैकनक्षत्रजननशान्तिकल्पस्समाप्तः ॥

No. 3365. पित्रादिऋक्षजननशान्तिः.

PITRĀDIṚKṢAJANANAŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 46*b* of the MS. described under No. 2840.

Subject similar to that of the above.

Complete.

Beginning:

मातृऋक्षे तु(जाते तु मातु)रायुःक्षयं(यो) भवेत् ।
सन्द(द)न्तजाते मूको वा अन्धो वा अङ्गहीनके ॥
पितृऋक्षे तु जाते तु पितुरायुःक्षयं(यो) भवेत् ।
पादलग्ने [थ]वांशवे(के) वा राशौ स्यादष्टमेऽपि वा ॥

* * * *

अथ शान्तिं प्रवक्ष्यामि शौनकोऽहं द्विजन्मनाम् ।

End:

अत्रोपकरणं सर्वमाचार्याय निवेदयेत् ।
ब्राह्मणान् भोजयेत्पश्चादाशिषो वाचयेदथ ॥

Colophon:

इति शौनकीये पितृ(त्रादि)ऋक्षजननशान्तिः ॥

No. 3366. पीनसरोगशान्तिः.
PĪNASARŌGAŚĀNTIḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 135*b* of the MS. described under No. 2973.

On the Śānti for getting rid of Pīnasa, a nasty disease affecting the nose.

Complete.

Beginning:

वक्ष्ये पीनसरोगस्य जपदानादिकं तथा ।
सौवर्णे(र्णी) राजते(तं) वापि कुर्याद्रुरुडनासवत् ॥
तन्मध्येऽपि लिखेन्मन्त्री गारुडैकाक्षरं शुभम् ।
वाय्वग्न्य(र्क)समायुक्तं विलिखेदग्निमण्डले ॥

End:

तं मन्त्रं दानमन्त्रस्स्यात् शृणु देवि महामते ।
पश्चात्तदौषधं दद्यात् सर्वपीनसशान्तये ॥

Colophon:

इति पीनसरोगशान्तिः ॥

No 3367. पुण्याहवाचनम्.
PUṆYĀHAVĀCANAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 2*a* of the MS. described under No. 2840.

Regarding the purificatory ceremony which is generally performed at the commencement and close of all important religious rites.

Complete.

Beginning:

पुण्याहवाचनं कर्म भगवान् शौनकोऽब्रवीत् ।
आद्यन्तयोस्तु कर्तव्यं सर्वेषां कर्मणां द्विजाः ॥

स्ववेदतन्त्रविद्विश्च पुण्याहकरणं भवेत् ।
चतुर्भिरेवमथ वा सर्वविप्रैस्तु वा भवेत् ॥

End:

अतो(पो) देवीति षड्भिश्च उद्गाता चेतृ(त्यृ)चैकया ।
पुण्याहं वाचयेत् . . . . स्ति न इत्यृचा ॥

. . . . . ऋद्धिकर्मणाम् ।

Colophon:

इति शौनकी(य)पुण्याहवाचनविधिः ॥

No. 3368. पुत्रकामेष्टिः.

PUTRAKĀMEṢṬIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 114*a* of the MS. described under No. 2898.

Regarding the sacrificial ceremony to be performed by childle persons with a view to beget children.

Beginning :

यदि जात(ाः) प्रमीयेरन् पुत्रा नैव भवन्ति वै ।
ऋतुकाले दिने षष्ठे दम्पती समलङ्कृतौ ॥
कृत्वाभ्युदयिकं श्राद्धं स्वस्तिवाचनपूर्वकम् ।
पूर्णपात्रविधानान्तं मुखान्तं क्रमकृत्ततः ॥

End :

उपग(र)म्य ततः पत्नीव्यंवायाच्च यथाविधि ।
एवमुत्पादिताः पुत्रा न लि(लु)प्यन्ते कदाचन ॥

Colophon :

इति पुत्रकामेष्टिः ॥

No. 3369. पुनराधानम्.

PUNARĀDHĀNAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 6*a* of the MS. described under No. 2840.

Regarding the ceremony to be performed for reconsecrati the sacred fire when its continuous preservation has been disturb

By Śaunaka.

Complete.

Beginning :

अथ गृह्यस्य नष्टस्याप्यग्नेराधानमुच्यते ।
उपोष्य दम्पती . . होमद्रव्यं द्विजातये ॥

अन्यत्किञ्चिद्यथाशक्ति ब्राह्मणायाग्नि(हि)तामये ।
आद(ध)त्ताद(म)पराह्णेऽग्निं मथनद्रव्यसञ्चितौ ॥

End :

अया मा नो इति द्वाभ्यां सन्धाने गृह्यकर्मणि ।
दक्षिणां च यथाशक्ति दद्याद्वेदार्थसंविदे ॥

Colophon :

इति शौनकीये पुनराधानविधिः ॥

No. 3370. पुरुषसूक्तहोमः.

PURUṢASŪKTAHŌMAḤ.

Pages, 13. Lines, 15 on a page.

Begins on fol. 191*a* of the MS. described under No. 1197.
On a ceremony intended to help one to beget children.
Complete.

Beginning :

अथ सन्तानयन्त्रप्रसङ्गात् यन्त्रसारोक्तं सन्तानकरं पुरुषसूक्तमन्त्रमात्रं लिख्यते—

षट्कोणकर्णिकामध्ये तारं साध्यसमन्वितम् ।
सुदर्शनषडर्णं च षट्सु कोणेषु सन्धिषु ॥

* * * *

हैयङ्गवीने प्रविलिख्य यन्त्रं त्रिवारमेतत् प्रतिजप्य सूक्तम् ।
प्रातस्समद्याद्वनिता विदग्धं पुत्रं प्रसूते कमलाक्षतुल्यम् ॥

End :

चतुर्दश्याञ्जलिं कृत्वा पञ्चदश्या प्रदक्षिणम् ।
षोडश्योद्वासनं कुर्यात् शेषकर्माणि पूर्ववत् ॥

No. 3371. पुष्यनक्षत्रशान्तिः.

PUṢYANAKṢATRAŚĀNTIḤ.

Pages, 2. Lines, 7 on a page

Begins on fol. 11*b* of the MS. described under No 3239.

On the performance of a Śānti when a child is born under the lunar asterism Puṣya.

Complete.

Beginning :

गण्डनक्षत्रशान्तिविधिरुच्यते—

अभुक्तेनर(क्तऋक्ष)जातस्तु सूतकान्त्यदिनेऽथवा ।
शान्तिं शुभदिने कुर्यात् तावत्पुत्रं न लोकयेत् ॥
तिथिगण्डमनड्वाहं नक्षत्रं धेनुरुच्यते ।
काञ्चनं लग्नगण्डं तु गण्डदोषो विनश्यति ॥

End :

आयुरारोग्यमैश्वर्यं संप्राप्नोति दिने दिने ।
धनधान्यसमृद्धिस्स्यात्पुत्रपौत्रस(मृद्धि)मान् ॥

Colophon :

इति पुष्यनक्षत्रजननशान्तिस्समाप्ता ॥

No. 3372. पुष्यपूर्वाषाढाशान्तिः.

PUṢYAPŪRVĀṢĀḌHĀŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 39*b* of the MS. described under No. 2840.

Complete.

Same subject as the above.

Beginning :

जलर्क्षे वाथ पुष्यर्क्षे जातके च शिशोः क्रमात् ।
आद्यपादे च पितरं द्वितीये मातरं तथा ॥

End:

ब्राह्मणान् भोजयेत्पश्चादाशिषो वाचयेदथ ।
मातापित्रोश्शिशोश्चैव सर्वारिष्टं विनश्यति ॥

Colophon:

इति शौनकीये पुष्यपूर्वाषाढाशान्तिः ॥

No. 3373. पूगसीमन्तविधिः.
PŪGASĪMANTAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 2840.

On the ceremony of Śīmanta to be performed with the aid of areca palms.

Complete.

Beginning:

पश्चाद्बृहमुखं कृत्वा कुम्भस्थापनपूर्वकम् ।
सुवर्णेन तदर्धेन भूमिरूपं प्रकल्पयेत् ॥
भूमिर्भूम्नेति मन्त्रेण अर्चयेत्तु यथाविधि ।

अथातः पूगसीमन्तविधिं व्याख्यास्यामः—

शैशिरहेमन्तयोरापूर्यमाणपक्षे पुण्ये नक्षत्रे प्रथमे गर्भे पूर्वाह्णे प्रारभेत.

End:

ब्राह्मणान् भोजयित्वा आचार्याय वरं दत्वा इष्टकामानवाप्नुयादित्याह भगवान् बोधायनः ॥

Colophon:

इति बोधायनोक्तपूगसीमन्ताविधिः ॥

No. 3374. पूगसीमन्तविधिः.
PŪGASĪMANTAVIDHIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 2840.

Same subject as the above.

Beginning:

शौनकोऽहं (प्रवक्ष्यामि पूग)सीमन्तमुत्तमम् ।
चतुर्वृक्षेषु मध्येषु स्थण्डिलं कारयेदथ ॥
द्वौ वृक्षौ मिथुनौ कृत्वा पूर्णे माङ्गल्यसूत्र(के) ।
(नववस्त्रेण) संवेष्ट्य अलङ्कृत्य यथाविधि ॥

End:

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥

Colophon:

इति बृहच्छौनकीये पूगसीमन्तविधिः ॥

No. 3375. पूर्वफल्गुनीप्रथमार्तवशान्तिः.

PŪRVAPHALGUNĪPRATHAMĀRTAVAŚĀNTIḤ.

Substance, palm-leaf. Size, 7 × 1⅛ inches. Pages, 2. Lines, 5 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 43*a*. The other works herein are: — Daśāphalavrata 1*a*, Gōpadmavrata 6*b*, Ṛṣipañcamīvratam 11*b*, Ṛṣipañcamīvratōdyāpana 32*a* and 36*a*, Hōmavidhi 39*b*, Vyatīpātavaidhṛtiprathamārtavaśānti 43*b*, Viṣanāḍīprathamārtavaśānti 46*b*, Naṣṭadōraprāyaścitta 49*a*, Liṅgapūjāvidhāna 51*a* Lakṣavartīvratavidhāna 71*a*.

On the Śānti to be performed when a girl attains puberty under the lunar asterism Pūrvaphalgunī.

Complete.

Beginning:

पूर्वफल्गुनीशान्तिमाह —

पूर्वफल्गुनिनक्षत्रे यदि नारी रजस्वला ।
शोकसन्तप्तपर(तप्ताथ व)न्ध्या वा दुःखमृत्युमवाप्नुयात् ॥
अतः शान्तिं प्रवक्ष्यामि सर्वारिष्टोपशान्तये ।

End:

एतत्कुर्वन्ति(वैस्तु) सततं [सर्वारिष्ट]सर्वारिष्टविनाशनम् ।
पुत्रपौत्रम(त्रान)वाप्नोति सर्वकार्य(स्य) सिद्धये ॥

Colophon:

इति पूर्वफल्गुनी[शान्ति]शान्तिस्समाप्ता ॥

No. 3376. पूर्वाषाढानक्षत्रजननशान्तिः.

PŪRVĀṢĀḌHĀNAKṢATRAJANANAŚĀNTIḤ.

Pages, 8. Lines, 4 on a page.

Begins on fol. 59*a* of the MS. described under No. 3232.

On the Śānti to be performed when a child is born under the lunar asterism Pūrvāṣāḍhā.

Complete.

Beginning:

पूर्वाषाढे च पुष्यर्क्षे शान्तिर्जातस्य कथ्यते ।
तयोः पादक्रमेणैव पितुर्मातुस्सुतस्य च ॥

End:

आयुरारोग्यवृद्धिश्च सदा सौभा(ग्यमेव च) ।
(धनधान्यप्रजावृद्धिः) सौख्यं चैव प्रजायते ॥

Colophon:

इति वराहसंहितोक्त(पूर्वाषाढानक्षत्रजननशान्तिः समाप्ता) ॥

No. 3377. पूर्वाषाढानक्षत्रजातशान्तिः.

PŪRVĀṢĀḌHĀNAKṢATRAJĀTASĀNTIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 6*a* and 49*b* of the MS. described under No. 3237.

Same subject as the above.

Beginning:

पूर्वाषाढापो देवता(देवतापो रक्तव)र्णं त्रिलोचनम् ।
द्विभुजं पाशु(श)वज्रञ्च धारयेत्कमलासनम् ॥
नीलवस्त्रयुगोपेतं सशक्तिकमलाक(लङ्कृ)तम् ।

End:

अब्भ्यः स्वाहा । पूर्वाषाढाभ्यां स्वाहा । समुद्राय स्वाहा । कामाय स्वाहा । एतदुद्देशत्यागः । तिलव्रीहयश्च द्रव्याणि ॥

इत्युपहोमः ॥

Colophon:

इति वृद्धगार्ग्योक्तपूर्वाषाढानक्षत्रशान्तिः ॥

No. 3378. पूर्वाषाढादिनक्षत्रजननशान्तिः.

PŪRVĀṢĀḌHĀDINAKṢATRAJANANAŚĀNTIḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 25*b* of the MS. described under No. 3302.
Same subject as in the above.
Complete.

Beginning:

अतः परं प्रवक्ष्यामि सर्वशास्त्रं विचारयन् ।
पूर्वाषाढे च पुष्ये च उत्तरे गुरु(त्वष्टृ)भे तथा ॥
वृद्धगार्ग्येण रचितं लोकानां हितकाम्यया ।

End:

इति संक्षेपतः प्रोक्तं पुष्याद्र(द्यृ)क्षप्रशान्तिकम् ।
अधिकं वृद्धगार्ग्येण क(कि)मन्यच्छ्रोतुमिच्छसि ॥

Colophon:

इति वृद्धगार्ग्योक्तपुष्यपूर्वाषाढोत्तरचित्रानक्षत्रजननशान्तिः ॥

No. 3379. प्रथमार्तववारादिफलानि.

PRATHAMĀRTAVAVĀRĀDIPHALĀNI.

Pages, 5. Lines, 5 on a page.

Begins on fol. 23*b* of the MS. described under No. 3302.

Regarding the effect of a girl's first attaining puberty on particular days of the week.

Beginning:

सूर्यवारे सुतो नास्ति सोमवारे पतिव्रता ।
भौमवारे पतिं हन्ति बुधे सम्पु(त्पु)त्रसम्भवः ॥
गुरुवारेतुसीत्वि(ऽर्थसिद्धि)स्याच्छुक्रवारे ब(हु)प्रजा ।

End:

कूपे निबन्धुता तत्र गृहे पतिसुखं भवेत् ।
बाह्ये बह्वचह(हुद)रिद्रा(च) द्वारे स्यात्पुत्रहारिणी ॥

No. 3380. प्रथमार्तवशान्तिः.

PRATHAMĀRTAVAŚĀNTIḤ.

Pages, 18. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 3239.

Deals with the Śānti to be performed for averting the evil effects supposed to arise, when a girl first attains puberty on certain inauspicious Tithis, days, etc.

Same subject as that of the above.

Complete.

Beginning:

अतः परं प्रवक्ष्यामि शृणु शौनक यत्नतः ।
व्यतीपाते[तु] वैधृश्चे(तौ चे)त् रजो दोषाय कल्पते ॥
प्रथमस्यार्तवे काले व्यतीपातस्तु संभवेत् ।
स्त्रीणां च सर्वदुःखं च सर्वनाशो भवेद्ध्रुवम् ॥

* * * *

आयुरारोग्यमैश्वर्यमवैधव्यमवाप्नुयात् ।
सर्वदुःखनिवृत्तिश्च पुत्रपौत्रप्रवर्धनम् ॥

Colophon :

इति शौनकीये व्यतीपातवैधृतिरजस्वलाशान्तिः समाप्ता ॥

End :

घृतपायसनैवेद्यं तिलदूर्वापायसाज्येन होमः । गवां पतिः फल्गुनीनामष्टौ(ष्ट)वाक्येन हविः पूर्वोक्तविधिना तयोस्सवस्त्रप्रतिमां दद्याच्छुभां गाम् ॥

Colophon :

इति यामलोक्तदुष्टनक्षत्रशान्तिः ॥

No. 3381. प्रथमार्तवशान्तिः.

PRATHAMĀRTAVAŚĀNTIH.

Pages, 16. Lines, 6 on a page

Begins on fol. 91*b* and 99*b* of the MS. described under No. 3237.

Complete

Same subject as that of the above.

Beginning :

अथ रजस्वलाकालनिरीक्षणफला उ(न्यु)च्यते(न्ते) ।

स्वायंभुवमनु(रु)वाच—

अथातस्सं प्रवक्ष्यामि पुष्पवत्य(त्याः) शुभाशुभम् ।
प्रातःकाले च्छु(शु)भं भूयात्सङ्गवे शुभसङ्कुलम् ॥

* * * *

उत्पातेष्वपि चान्येषु नारीणां प्रथमार्तवे ।
तत्र शान्तिं प्रकुर्वीत घृतदूर्व(र्वा)तिलाक्षतैः ॥

End:

(दिग्व)ल्लभादिभिर्युक्तं कुम्भे वरुणमर्चयेत् ।
अभिषेकञ्च दानञ्च कुर्यात्तद्दोषशान्तये ॥

Colophon:

इति प्रथमार्तवशान्तिः ॥

No 3382. प्रथमार्तवशान्तिः.

PRATHAMÂRTAVAŚÂNTIH.

Pages, 31. Lines, 4 on a page.

Begins on fol. 48b of the MS. described under No. 2973.

Incomplete.

Same subject as that of the above.

Beginning:

आर्तवानाञ्च नारीणां शान्तिं वक्ष्याम्यतः परम् ।
चतुर्थदिवसे प्राप्ते स्नातान्तामभिषेचयेत् ॥
ऋक्षाधीशं सुवर्णेन धर्मशास्त्रोक्तमार्गतः ।
सुवर्णेन तदर्धेन तदर्धार्धेन वा पुनः ॥
गृहस्येशानदिग्भागे गोमयेनोपलेपिते ।
पुण्याहवाचनं कुर्यादाचार्यवरणं ततः ॥

End:

तिलाक्षताज्याक्त(दि)होमं ततो दानं समाचरेत् ।
सर्वदोषविनिर्मुक्तः पुत्रवान् धनवान् गृही ॥

Colophon:

इति भानुवाररजस्वलाशान्तिः ॥

दिवा वा यदि वा रात्रौ भौमवारे रजस्वला ।
वन्ध्या वा बहुदुःखा वा.

No. 3383. प्रथमार्तवशान्तिः.

PRATHAMĀRTAVAŚĀNTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 83*b* of the MS. described under **No. 2840.**

Complete.

Same subject as that of the above.

Beginning :

शौनकोऽहं प्रवक्ष्यामि शान्तिं स्त्रीप्रथमार्तवे
स्नानस्य पूर्वदिवसे रात्रौ कुम्भं प्रकल्पयेत् ॥
गृहस्य पूर्वदिग्भागे ईशान्ये चोत्तरेऽपि वा ।
उपलेपादि कुर्वीत स्थण्डिलं कारयेदथ ॥

End :

गर्भाधानं शुभे काले रात्रौ कुर्यात्सुलग्नके ।
ब्राह्मणान् भोजयेत्पश्चादाशिषो वाचयेदथ ॥

Colophon :

इति बृहच्छौनकीये प्रथमार्तवशान्तिः ॥

No. 3384. प्रसूतिगंण्डदोषशान्तिः.

PRASŪTIGAṆḌADŌṢAŚĀNTIḤ.

Pages, 5. Lines, 4 on a page.

Begins on fol. 102*a* of the MS. described under No. 2973.

Regarding the Śānti to be performed in cases of child-birth under certain asterisms considered inauspicious.

Complete.

Beginning :

अथातस्संप्रवक्ष्यामि चित्रापुष्योत्तरासु च ।
पूर्वाषाढाप्रसूतौ च शान्तिकर्म विधीयते ॥

चित्राद्यार्धे पुष्यमध्ये द्विपादे पूर्वाषाढ[स्य]र्क्षस्य पादे तृतीये ।
जातः पुत्रश्चोत्तराद्ये विधत्ते मातापित्रोरात्मनाशं विधत्ते ॥

End :

एवं कृत्वा तु शान्तिं च गण्डदोषात् प्रमुच्यते ।
यत्तु(स्तु) शान्तिं न कुर्वीत लोभात्तस्यापदः पराः ॥

Colophon :

इत्यगस्त्यसंहितायां चित्रापुष्योत्तरापूर्वाषाढाप्रसूतिगण्डदोषशान्तिकल्पस्समाप्तः ॥

No. **3385.** फलोद्गमादिक्फलम्.

PHALŌDGAMADIKPHALAM.

Pages, 3 Lines, 7 on a page.

Begins on fol 20*a* of the MS. described under No. 2840.

On the Śānti to be performed when the fruits of certain trees first grow from those trees in certain inauspicious directions.

Prayōga according to Śaunaka.

Complete.

Beginning :

क्रमुकपनसनालिकेररम्भा लिकुचनगादिफलोद्गमो यदि स्यात् ।
शशधरशक्र(वृष)वारुणासु(दि) दिक्षु भवन्ति(ति) शुभन्त्वशुभं तथान्यदिक्षु ॥

का(क्र)मुका(नां) पनसनालिकेराश्र(णां) रम्भादीनां फलोद्गमः(मे)—

ऐन्द्रे तु पुत्रलाभस्स्यात् अग्नेर्यं(आग्नेय्यां) धान्यनाशनम् ।
दक्षिणे मृत्युमाप्नोति नैर्ऋत्यां मरणं ध्र(ध्रु)वम् ॥

End :

पश्चाद्गृहमुखं कृत्वा अभिषेकमथाचरेत् ।
आचार्यं पूजयेत्पश्चादृत्विजः पूजयेत्ततः ॥

दशदानं ततो दद्याद्ब्राह्मणान् भोजयेत्ततः ।
सर्वारिष्टविनाशाय शान्तिं कुर्यात्तदे(दै)व हि ॥

Colophon:

इति शौनकीये क्रमुकनालिकेररम्भाशान्तिः ॥

No. 3386. बालग्रहचिकित्सा.
BĀLAGRAHACIKITSĀ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 136*r* of the MSS described under No. 2973.

On remedial measures to be adopted when a child comes to be possessed by evil spirits.

Beginning:

अथ रावणीयबालग्रहविधिरुच्यते—

वी(व)रप्रदान(सादं)गोकर्णे लब्ध्या(ब्ध्वा)रावणसूरिणा ।
कृतङ्कुमारतन्त्रं यत् प्रवक्ष्येऽहं समाहितः ॥
दिवसे मासि वर्षे च एकतन्त्रेण वक्ष्यहम् ।
अन्नं देवान् स्वस्तिकांश्च धूपं स्नानं यथाक्रमम् ॥

अत्रायं क्रमः.

End:

एवं त्रिदिनं बलिन्दद्याच्चतुर्थे दिवसे शान्त्युदकेन स्नापयेत् क्षीरोदनं ब्राह्मणान् भोज(येत्) ॥

No. 3387. बालग्रहरोगचिकित्साविधिः.
BĀLAGRAHARŌGACIKITSĀVIDHIḤ

Pages, 12. Lines, 4 on a page.

Begins on fol. 1*r* of the MS. described under No. 2973.

On the same subject as that of the above.

Complete.

Beginning:

द्वितीये दिवसे मासे वर्षे वा सुन(न्दा नाम देवता) बालं गृह्णाति । तया गृहीतस्य ज्वर-दन्तपीडन-अक्षिनिमीलन-सन्ततरोदन-अन्नद्वेष-शस्यानि स्युः ।

ओं नमो भगवति सुनन्दा नाम देवते बलिं गृहाण बालकं मुञ्च मुञ्च स्वाहा ।

End:

अनेन तद्बलिं दक्षिणस्यां दिशि निदध्यात् । एवं त्रिदिनं दद्यात् । धूपस्नानभोजनादि पूर्ववत् । एवं कृते सति बालकस्यारोग्यं भवति ॥

Colophon:

इति बालग्रहरोगस्य चिकित्साविधिस्समाप्तम्(:) ॥

No. 3388. बृहस्पतिशान्तिः
BRHASPATIŚĀNTIH.

Pages, 2. Lines, 7 on a page.

Begins on fol. 50*b* of the MS. described under No. 2840.

On the Śānti to be performed for averting the evil supposed to result to one, if the planet Bṛhaspati (Jupiter) moves to certain positions in respect to one's sign of nativity.

Complete.

Beginning:

यस्य राशौ तृतीये(ऽथ षष्ठे वाप्यष्टमेऽपि) वा ।
दशमे द्वादशे वापि पीडयेच्च यथा गुरुः ॥

तस्य शान्तिं प्रवक्ष्यामि भगवान्मुनिपुङ्गवः ।
गृहस्य पूर्वदिग्भागे ईशाने चोत्तरेऽपि वा ॥

End:

पीतवस्त्रद्वयं दद्याद्दरिद्राय कुटुम्बिने ।
ब्राह्मणान् भोजयेत्पश्चादाशिषो वाचयेदथ ॥

Colophon:

इति शौनकीये बृहस्पतिशान्तिः ॥

No. 3389. भानुवारजन्मर्क्षयोगशान्तिः.

BHĀNUVĀRAJANMARKṢAYŌGAŚĀNTIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol 146 of the MS. described under No. 2898.

On the performance of a Śānti when one's birth-asterism falls on a Sunday.

Complete.

Beginning:

अथ शान्तिं प्रवक्ष्यामि ग्रहशान्तिमनुत्तम(ा)म् ।
भानुवारयुतो(ते) जन्मनक्षत्रो(त्रे) रोगसम्भवः ॥
महायासो भवेद्वापि राजक्षोभोऽथ वा भवेत् ।
